M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 741

Title: Tarkik Shiromani
(Nyaya)

941

Tarkik Shiromani- (Nyaya)	Title
	Author
	Editor
	Year, Vols.
	Publisher
941	Remarks

नाडिङ्ग शिरो मणि   Book on Nyaya

शि०म० श्रीगणेशाय नमः आराध्यदेवतायै नमः ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते अखंडानंदबोधाय पूर्णाय परमात्मने १ अध्ययनभावनाभ्यां सारं नि
१ णीय निखिलतंत्राणाम दीधितिमधिचिंतामणि तनुते तार्किकशिरोमणिः श्रीमान् २ परजुष्टनयान्निवर्त्तमानामनोज्ञास्वादरसा विशुद्धबोधाः रघुना
थकवेरपेतदोषां कृतिमेतां विदुषां तनोतु मोदं ३ न्यायमधीते सर्वस्तनुते कुतुकान्निबंधमप्यत्र अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ४
मान्यान्प्रणम्य विहितांजलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि दृष्यं वचो मम परं निपुणं विभाव्य भावावबोधविहितो न दुनोति दोषः ५
एवं परग्रंथैकवाक्यताप्रतिपत्तये शिष्यावधानाय च संगतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षेत्यादि अत्रोपजीव्योप
जीवकभावः फलतः स्वरूपतश्च प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेपि न सर्वा प्रत्यक्षप्रमितिस्तथा अनुमितयस्तु सर्वाः
साक्षात्परंपरया वा व्याप्त्यादिप्रत्यक्षोपजीविकाः पुरस्कृतश्चायमुपजीवकतोत्कर्षः यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननीसमयमप्र
त्यक्षतादिवरिष्ठादिकं अनुमितिं ईश्वरप्रत्यक्षं तु न फलं तथापि दृष्टद्वारकमिह तथात्वमादरणीयं इतरस्याविनिगम्यत्वात् संवेच अनुमि
तिकरणं इंद्रियापेक्षोत्पत्तिकं आनुमितिं भावयतो पीश्वरज्ञानस्य तत्करणतानिर्वाहकप्रत्यासत्तिविरहेणातत्त्वात् संवपुनरिंद्रियं नानुमानाधीन
जन्मा मनःश्रवणयोरजन्यत्वात् दृष्टद्वारा वा तथात्वमादरणीयं न चोत्पत्तिमात्रपींद्रियं दृष्टद्वारकमनुमानमपेक्षते अथोपजीव्यं निरूप्यैवोपजी   शि०म०
वकं निरूप्यतइति न नियमः क्वचित्कार्यं निरूप्यापि कारणनिरूपणादिति चेत् किं चातः नहि संगतिरनंतराभिधानव्याप्या अनंतराभिधानप्रयोजक जि   १

ज्ञासाजनकज्ञानविषयोह्यर्थः सति गः जायते च कार्ये कारणे वा ज्ञाते कारणत्वस्य कार्यत्वस्य वाज्ञाना त्किमस्य कारणं कार्यं वेति जिज्ञासा अतस्तयोर्द्वयोरेव संग
तित्वं इत्थं चोपजीवकतायास्तुल्यत्वेपि न क्षतिरिति मंतव्यं लाघवाय अत्रैवोपमानस्य संगतिं दर्शयति बहुवादीति सुप्रसिद्धतया निरसनीयत्वबादि
विप्रतिपत्तिकत्वेन सुप्रतिपदतया चानुमानमेव व्युत्पित्सोः प्रथमं जिज्ञासा नोपमाने अप्रसिद्धत्वात निरसनीय बहुवादिविप्रतिपत्तिकत्वे नातिदु
रूहत्वाच्च औत्सर्गिकी रीतिमनुरुध्य चेदं तेन कस्यचित्प्रथमं दुरूहे जिज्ञासोदयेपि न क्षतिः तथा चावसरसंगत्योपमान निरूपणमिति भावः यथा
चावसरस्य संगतित्वं तथाव्यक्तमाकरे शब्दांतरसमयग्राहकं समवायेनिमित्तत्वबोधकं सामान्यातोदृष्टो अंततो दृष्टजनकमदृष्टोपयिकं वानुमान
मपेक्षते निखिलमेवोपमानमितीहापि उपजीवकत्वमेव संगतिरित्यपि केचित् संभवति चेह निरूपणयोरपि कारणभावः अथ तत्पूर्वकमित्यादि
सूत्रे प्रत्यक्षपूर्वकत्वोनानुमाननिरूपणानंतरं तद्बुद्धेन च व्याप्त्यादिप्रत्यक्षपरामर्शोति अत्रापि सहचारप्रत्यक्षजन्यत्वादिनातन्निरूपणात् तस्य च प्रत्य
क्षनिरूपणाधीनत्वात् एवमानभिन्नत्वेनोपमाननिरूपणमपि अनुमाननिरूपणापेक्षमिति संक्षेपः तत्र० लक्षणस्वरूपप्रामाण्यादिभिरनु
माने निरूपवाये करणस्य क्रियाभेदाभिन्नमर्तिकतया क्रिया लक्षणपूर्वकं तल्लक्षणमाह व्याप्तीति अत्र व्याप्तिविशिष्टत्वपक्षधर्मत्वसामा
नाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् ज्ञानपदोपसंधा
नेन च बाधिताबाधितसाधारणज्ञातज्ञानत्वाभात् न भ्रांतानुमितिव्याप्तिरित्याहुः तन्न परामर्शेनानियमतो व्याप्तिवैशिष्ट्यादि सामाना
धिकरण्यग्रहे मानाभावात् गोरवेण तद्विषयकत्वेनाहेतुत्वात् सबंधसंबंधाग्रहे विविशिष्टज्ञानत्वस्योपपादितत्वात् भ्रमस्यालेचता

शि॰म॰ २ दृग्भासामानाधिकरण्यप्रसिद्धात ज्ञानस्यासंभवात् असन्नव्याप्तिनिरासात् अवांतरवाक्यार्थयोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात्ः विषा
णेशशसंबंधाभावनिश्चयदशायां शशविषाणजन्यं कार्मुकमिदमिति शाब्दबुद्धेर्भ्रमणोपि दुरुपपादत्वात् न चात्र प्रमाणम् स्तावात् भ्रमैवलक्ष्या यदि
च सल्लिंगपरामर्शादपि भ्रांतानुमितिस्तदा चरमज्ञानपदं प्रमापरमितिवाच्यं अव्याप्यपक्षधर्मयोस्तत्त्वावगाहिना परामर्शेन जनितायां वस्तुतः सा
ध्यावत्त्वस्यावगाहितया प्रमायामव्याप्तेः लिंगोपहितत्वलैंगिकभाननिरासेनाशीकभ्रमत्वस्याप्ययोगात् ईश्वरतादृशज्ञानं जन्यत्वस्यत्वातिप्रसंज
कत्वात् अत एव व्याप्तिविशिष्टपक्षधर्मतात ज्ञानं वेत्यादिकमपास्तं व्याप्तिविशिष्टं च पक्षधर्मश्चेति द्वंद्वाश्रयणात् व्याप्तिविशिष्टत्वपक्षध
र्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयादित्वेऽन्यत्र च द्वंद्वस्य दर्शनात् पदार्थद्वयाभेदबो
धकाच्च कर्मधारयात् भेदाभेदोदासीनपदार्थद्वयबोधकत्वेनैव द्वंद्वस्य भेदावत् व्याप्तिविशिष्टपदस्य धर्मपतरतयावाव्याप्तिवै शिष्ट्यपक्षधर्मतया
लाभात् न चैवमालोको वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानजन्येऽतिव्याप्तिः एकत्रोभयावगाहित्वस्योक्तत्वादिति चेत् तदप्यसत् एवमपि धूमो वह्नि
व्याप्योऽद्रव्यपर्वतवृत्तीति ज्ञानजन्येऽतिप्रसंगात् एकरूपेण तदुभयावगाहित्वस्योक्तौ च मीमांसकमतानुप्रवेशात् मिथस्तदुभयोपश्लेषावगाहित्वस्य
चपरामर्शाव्यापकत्वात् न चात उभयाविषयकत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककार्यताशालित्वमर्थः पक्षधर्मतापक्षदोनवैय्यर्थ्यात् व्याप्तिवि के॰म॰ २
शिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमिति तु स्यात् यद्यप्यत्रापि धनुस्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमाना
धिकरणधूमवानिति परामर्शजन्येऽव्याप्तिः अखंडव्याप्तेरप्रसिद्धेः तन्मानुमितेर्लक्ष्यत्वं तु अत्राकाशमात्मनस्साद्दे तु तदंतथा तथापि तादृशपदार्थानां

तथाविधपरस्परोपश्लेषावगाहित्वमत्र विवक्षितम् न च व्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् भ
वतीति धूमसमानाधिकरणात्यंताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधीवि
रोधः तथाविधधूमसमानाधिकरणत्वादिकं तु न तथा रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्धा न च भ्रम
संशयोत्तरप्रत्यक्षे प्रतिविशेषदर्शनस्य हेतुतामते च तत्रातिव्याप्तिः तथाविधनिश्चयत्वेन हेतुताया विवक्षितत्वात विशेषदर्शिविशेषदर्शनस्य च भ्रमादिविरोधित्व
न तत्त्वमित्युक्तत्वात् अत एव लिंगबलादिलक्षणानिर्देशाद्वाक्यार्थज्ञानजन्योपमितौ नातिव्याप्तिः तथाविधवाक्यार्थप्रतिसंधानत्वेन तस्याहेतुत्वात् न चो
पनयार्थज्ञानजन्यन्यायार्थज्ञानेन तच्छब्देन संकेतितशब्दांतरेण वा व्याप्त्यादिवैशिष्ट्योपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः व्युत्पादयिष्यमाणमहा
वाक्यार्थज्ञानेऽवांतरवाक्यार्थज्ञानस्य हेतुत्वं तदादेश्यविशेषरूपेणोपस्थापकत्वमिति वाच्यं तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशा
न्निश्चयत्वस्याप्रवेशाच्च न च तथापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वान्न हेतुत्वात् तादृशशाब्दबोधप्रत्यक्षे
चातिव्याप्तिः दंडो रक्तो न वेति संशये रक्तदंडवानयमिति ज्ञानानुदयादिति वाच्यं ज्ञानोपनयेऽपि विशिष्टविषयोपधानेच्छाद्वयोः कृतेश्च साक्षात्कारात् वि
शेषणविषयकादिविशिष्टसंस्कारादेव विशिष्टस्मरणाच्च तद्विषयकगुणांतरहेतुत्वेन नरनहत्तेर्ज्ञानहत्तेर्ज्ञानत्वस्याप्रवेशादिच्छादितःसंस्काराच्चानुमितानु
दयात्संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात् न च परामर्शानुव्यवसायेऽतिव्याप्तिः सामान्यतः प्रत्यक्षविषयत्वेन तत्तद्विषयकप्रत्यक्षेन तत्त्वेन कदाचित्तद्वा
नादिप्रत्यक्षेऽज्ञानत्वादिना तत्र हेतुत्वं न तु यावनेव तत्तदितरत्वादिविषयनिष्ठो धर्मस्तेन तत्तद्विषयकत्वेन च कार्यकारणभावो मैत्रावलोकितचैत्रानिमितनीलेतरघटत

शि·म·
३

द्विषयकत्वादिना तत्वेऽनन्तकार्यकारणभावप्रसंगात्‌ मानाभावात्‌ अन्यथोपपत्तेश्च अविशिष्टस्मरणेऽतिव्याप्तिः नचोपेक्षान्यत्वेन तत्र हेतुत्वं उपेक्षात्वं हि जातिश्चा
क्षुषत्वादिना संकरप्रसंगात्‌ आंशिकत्वोपगमाच्च नापि प्रवृत्तिनिवृत्त्यजनकत्वं अजिज्ञासितविषयत्वं वा ताहृशादपि स्मृत्युत्पादनात्‌ नापि संस्काराजनकत्वं न जनकतावच्छे
दककूपान्तरापरिचयात्‌ अन्योन्याश्रयप्रसंगात्‌ संस्कारानुत्पत्त्यैव स्मरणासंभवे स्मृतिजनकतायां तत्प्रवेशाच्च नाप्यनुभवत्वेनैव तथात्वं संस्कारस्य फलना
श्यतया सकृदनुभूतस्य स्मरणोत्तरं स्मरणप्रसंगात्‌ समानाकारस्य फलस्यैव नाशकत्वात्‌ समूहालंबनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तेः जाय
ते च पुनः पुनः स्मरणात्‌ दृढतरः संस्कारः परित्यज्य च निश्चिताव्यभिचारकं रूपं ग्रहमात्राव्यभिचारकेणारणत्वकल्पनानुदयात्‌ इदमेव चान्यत्र सामान्यस्य हे
तुतावच्छेदकत्वे बीजं अभिहितं च तात्पर्यटीकायां प्रथमसूत्रेव यथा विवेचनप्रस्तावे मिश्रैः स्मृतौ नास्यकार्यसंस्कारविरोधिनीनामसहभावादिति चेन्न चे
रमज्ञानपदस्यानुभवपरत्वात्‌ साक्षात्कारान्यत्वस्य विवक्षितत्वादित्यपि कश्चित्‌ किंच व्याप्यविशेष्यकास्मृतविशेष्यकाच्च परामर्शादनुमितिदर्शनात्‌
तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वे लक्षणघटकमपि तदेव एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात्‌ अन्यथा नियमेन स्म
तेरुभयविशेष्यकत्वप्रसंगात्‌ समानप्रकारत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्च तत्र विशिष्यैककार्यकारणभावः नन्वेकरूपेण गौरवात्‌ माना
भावाच्च एवं च विशिष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रसंगशंकापि वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविषयधर्मप्रकारकपक्षधर्मताज्ञानस्य
नहेतुतामते च नितरां तथैव लक्षणप्रवेशात्‌ अत एव व्याप्यवत्पक्षाद्यवग्राहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः व्याप्यविषयकत्वेन वा जन्य
ज्ञानं विशेषणीयं एतेन स्मृतिं प्रति संस्कारद्वाराऽनुभवं प्रति च साक्षात्‌ विशेषणधियो हेतुत्वस्य निर्विकल्पकानभ्युपगमे कस्य वा स्मारणस्यानुभवं प्रत्येव वा तस्य हे

तुत्वस्य नियमतः क्वचित्साक्षात्कार एवं विषयस्मृतेश्च कल्पनात्‌ व्याप्यवत्पक्षवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपि परास्तं साध्यादेरननुगमात्‌ एकोपादानेऽन्या
नुमितौ दैवात्‌ व्याप्तिविषयिण्यां चतस्यामव्याप्तिः परमवशिष्यते सा चैताहृशज्ञानहेतुसनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनीया एतन्माभायेनैव चानुभवादु
क्ते चरमज्ञानपदं एवं चान्वयव्याप्तिव्यतिरेकव्याप्त्योः पृथक्प्रयोजकत्वेऽपि न क्षतिमत्त्वेऽपि न पर्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रति
योगिककार्यतावद्व्याप्यवत्त्ववत्ते निश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकहानिकार्यतावान्‌ वाऽवच्छेदकाज्ञानवृत्तिः सामानाधिकरण्येन वाऽवच्छे
दिका वा जातिस्तद्वत्त्वं वा ध्वंसाव्याप्तिमाने वस्त्वपि समानोपस्तादृशानुमित्यविषयोऽर्थस्तविषयत्वमात्रं याऽन्याह्यां कोचिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेता
नुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमिति वा वक्तव्यं अनुभवत्वजात्यनंगीकारे तु तद्व्यक्तिसमवेतधर्मसमवायित्वं व्यक्तं व्याप्तिज्ञानत्वावच्छि
न्नकारणताप्रतियोगिकाकार्यतावच्छेदकावच्छिन्नाया विशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यतायास्तत्समानाधिकरणानुभवत्वव्याप्यजा
तिमत्त्वं तत्त्वमित्यपि केचित्‌ परे तु पक्षधर्मतेत्यत्र पक्षताविशेषणं तथा चाऽपक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः यथोक्तायाविशेष्याद्यभावकृ
पाया वा पक्षतायाः प्रत्यक्षवारणाय परामर्शस्योपादानं तत्त्वेन जनकत्वं एकावच्छेदेन तदुभयजन्यत्वं च विवक्षितं तेन वाध्यादिकालीनेन लैंगस्मृतियो
गिविषयकेण परामर्शेन जन्ये पाक्षतायाः प्रत्यक्षे तदुभयसमूहालंबनेन वाऽनातिप्रसंगः तद्धत्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया च नाव्याप्तिरित्याहु
र्नत्विति यत्तत्करणमिति न च व्याप्त्यादिज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसंबंधेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरननुगमो
ऽपि प्राधिकस्य मागासिद्धिवारणमात्रप्रयोजनकत्वादिति वाच्यं फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात्करणत्वनिष्ठव्याप्तेस्तादृशज्ञा

नत्वसाधनत्वछेदत्वात्व्यतिरेकव्याप्तिर्गमकतयावेय्यर्थ्यशंकानवकाशाच्चेति किंगस्यनिरस्तत्वेपि अनुमितिकरणस्यस्वरूपतःप्रत्यक्षोपजीवकत्वेनवस्था
पयन्नाहतच्चेति अनुमितेर्ज्ञानाकरणकज्ञानत्वेनप्रत्यक्षमितिप्रध्वनिवेशोचतत्करणस्यापिप्रत्यक्षप्रमाणांतर्भावःस्यादिति।तन्निरस्यतितच्चेती सपिक
ल्पितः।अनुमानप्रामाण्यंपरीक्षितुंचार्वाकमतमुपस्थापयति अथेति अनुमानरनुमानत्वेनाभिमतं धूमादिज्ञानमप्रमत्वात्सुपनीतमेवानुमानवं
मेववासंवादेनसंवादाभिमानेन।संभावितस्यासतोनुगताकारस्यपरमार्थसत्त्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखात् अध्यक्षमूलकाविकल्पो
ल्लिखितत्वाद्विसंवादः अनुमानाप्रामाण्येचतन्मूलकसम्यानिर्णयाद्यधीनप्रवृत्तिकयोःशब्दोपमानयोरनुत्तरामप्रामाण्यान्नाप्रत्यक्षंप्रमाणमित्याह
इतीत्यादि अप्रमीणसाधर्म्येणप्रयोजकरूपभ्रूनत्वेन दृष्टसाधर्म्यस्यसाधर्म्यदर्शितस्यवा ननुअभिहितमेवसाधर्म्यदर्शनंसंभावयति।
संभावनैवचतुष्कशोव्यवहारहेतुरित्यतआह अनुमानमिति ननुनवयमापततोभ्रमजनकत्वलक्षणमप्रामाण्यंनिरूपयामोयेनभ्रमस्यविषय
वाधीनतयाप्रामाण्यंसंभाव्येताषिपरंतुप्रमाकरणत्वव्यतिरेकमतआह अपिचेति स्वतइति· नचानुगताकारासंस्पर्शिनिपरमार्थसत्त्वल
क्षणसंसाक्षिणिस्वसंवेदनसनिदितप्रामाण्येनिर्विकल्पकज्ञानेप्रामाण्यंसंदिह्यतेपरंतुतदुत्तरभाविनिसमुल्लिखितालीकानुगताकोरेसविक
ल्पकएवेतिवाच्य निर्विकल्पकस्यसन्मात्रावलंवनत्वस्वविषयत्वप्रामाण्यावेगादित्यानामनुमानाधीनासिद्धिकत्वात् सर्वमिदंसंनिव्याप्तिनिश्चये
स्यात्सएवतुनसंभवत्युपायाभावादित्याहव्याप्तीति समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानंव्याप्तिस्वरू
पणमारभतेनन्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकेसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति साध्यवद्भिन्नेयःसाध्याभाववद्

इदवृत्तित्वमित्यर्थः कर्मादौसंयोगाद्यभाववत्याभिन्नत्वेमानाभावादाह साध्यवदिति हेतोःसाध्यवत्यक्षभिन्नदृष्टांतवृत्तित्वेनाव्याप्तेराह सकलेति
साकल्यंसाध्याभाववतिसाध्येचबोध्यम् साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोवाभावोग्राह्यः तेनविपक्षैकदेशनिष्ठाभावप्रतियोगिनिव्यभि
चारिणिनातिव्याप्तिः नवानानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणिचाव्याप्यवृत्तावतिव्याप्तेर्वा
रणायाभावद्वयेप्रतियोगिव्यधिकरणत्वंबोध्यम् हेत्वभावोपिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणःतत्प्रतियोगित्वेचहेतुतावच्छेदकरू
पेणबोध्यम् तेनद्रव्यत्वादौसाध्यविशिष्टसत्त्वादौनाव्याप्तिर्नवाविशिष्टसत्त्वादिनातादृशाभावप्रतियोगिनिसत्त्वादावतिप्रसंगःपक्षैकव्यक्तिकंसा
ध्यंविपक्षोवातत्रनिर्धर्मत्वव्याप्येतत्त्वेनसाध्येनिर्वह्नित्वादौचाव्याप्तिः तत्रहेत्वभावस्यावह्न्यादेःप्रसक्तंयावद्विपक्षावृत्तित्वात् अतआह।साध्यव
दिति अत्रान्योन्याभावस्यसाध्यवत्तावच्छिन्नप्रतियोगिताकत्वंयुक्तमेवललभ्यं।नहिभवतिनीलोघटोघटान्यइति नापीति साध्यसमानाधिकर
णंयस्ययदधिकरणानधिकरणंसाध्यम् तत्त्वंसाध्यनिष्ठसामानाधिकरण्यप्रतियोगित्वं यासाध्यनिष्ठाधेयतानिरूपकाधिकरणवृत्तित्वमि
तियावत् तदनधिकरणत्वमर्थः साध्यवद्भिन्नस्यसाध्यनिष्ठाधेयतानिरूपकत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यक
त्वमितितुनिष्कर्षः तेनसत्तावान्द्रव्यत्वादित्यादौनदोषःसाध्यवैयधिकरण्यंसाध्यवद्भिन्नाधिकरणकालंचरमाधिकरणत्वंशस्यानतिप्रयोजनं तया
तदपहायद्वयमेकोक्त्यानूद्यदूषयति तदुभयमपीति साध्येत्यादि·साध्यंयदधिकरणानधिकरणंतत्त्वाभावःसाध्यस्ययदनधिकरणंतद्वृत्तित्वाभा
वश्चार्थः तत्रकेवलान्वयिनिसाध्यनिष्ठाधेयतानिरूपकाधिकरणाप्रसिद्धानानाव्यक्तिसाध्यकेचैकसाध्यव्यक्तिनिष्ठाधेयतानिरूपकत्वंसाध

नाधिकरणव्यक्त्यां नरस्येत्यव्याप्तिराद्यक्वचित्व्यभिचारिण्यतिव्याप्तिश्च द्वितीयो च साध्यवैयधिकरण्योयदि साध्यवत्तावच्छिन्नप्रतियोगिताकोभेदो विवक्षि
तः तदा केवलान्वयिनियुदि चयत्किंचित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः केचित्तु साध्येति साध्यसामानाधिकरण्यं हेतुतावच्छेदक
संबंधेन हेत्वधिकरणे तेनैवसंबंधेन साध्यवद्भिन्नत्वाभावः तदधिकरणभिन्नत्वमर्थः तेन धूमस्यस्वावयवे संयोगेन वह्निमति च समवायेनाद्दतावपि नक्षति
: तादृशाभावश्चतत्रैवसंबंधांतरेण वर्तमानेत्र लक्षणः व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशी तादृशाभाववत्वं सत्तायां गुणेन द्रव्यत्वसा
मानाधिकरण्यमित्यनुभवात् न चैवं विशिष्टसत्त्वे व्याप्तिः विशिष्टस्य अतिरिक्तत्वात् अनातिरेके तु विशेषणविशेष्यसंबंधस्यैव परंपरयाव्याप्यत्वात् केव
लान्वयिनि च स्वव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः तच्चिंत्यं सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणेन पृथिवीत्वसा
मानाधिकरण्यमिति प्रतीतिवत्तत्तन्निष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबंधेन सामानाधिकरण्यस्य वा भावं गुणे वगाहते न तु सत्ताया
मेव द्रव्यवृत्तित्वाभावं समानद्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावं समानद्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो वा न सत्तावृत्तिरित्यादि सर्वजनसिद्धप्रतीति
बाधितत्वात् बाधकाभावात् संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या नतु भयोरेकत्र सिद्धिः आतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसंग
श्च तत्र सामानाधिकरण्याभावस्य प्रत्यक्षासंभवेनासिद्धेः न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयं तद्वृत्तित्वस्यापाधित्वात् किंचेदमिदानीमिति
प्रतीतिनियामकविशेषणताविशेषेण हेतुतायां साद्धेतावव्याप्तिः तेन संबंधेनाधिकरणे काले येन संबंधेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः
समवायित्वे येति वाच्यत्वं यथा समवायित्वं यथा वक्ष्यते घटादिसमवायित्वे येत्यर्थ इत्यप्याहुः प्रमेयसाध्यके च भावत्वेनाभावानामभावत्वेन भावानां वा हि
त्वेनेति वह्नौ व्यक्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्वाभ्यां च प्रमेयमात्रस्याभावः सर्वत्र सुलभः ननु पारिभाषिकमेवाव्यभिचरितत्वं तथाहि यत्सम हल ५

नाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावंतोऽभावाः प्रतियोगिसमानाधिकरणत्वं सर्वत्र वाच्यत्वप्रभावस्य तथात्वात्
यावत्त्वोपादानं अत एव मूर्तत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ द्वित्वादिवच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येपि मूर्तत्वमनोन्यत्वाद्यभावस्य तथात्वात्
नातिप्रसंगः साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्त्वात् साध्यत्वभावस्यैव तथात्वात् साध्यतावच्छेदकेत्यादि येन संबंधेन हेतुस्तेनैव तदधिक
रणं बोध्यम् तेनात्मत्वे साध्ये समवायेन हेतौ ज्ञानस्य विषयतयाधिकरणे घटादौ वर्तमानस्य साध्याभावस्य तथात्वेपि न क्षतिः एवं दलांतरापि संबंधभेदेनैव
धर्मो दोषः संबंधैक्यविवक्षया निरसनीयः रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं हेतुरेव प्रलये परमाणुवृत्तिकाले चाव्यावितत्त्वात् नचे
प्रतियोगिवत् ध्वंसप्रागभावयोरत्यंताभावविरोधित्वमानाभावात् अत एवांतराश्यामे रक्तरूपं नास्तीति प्रत्ययः न चैवं रक्ते प्रध्वंसाद्यवगाही सर्वोपर राति
मध्वंसप्रागभावव्यतिरिक्तोपि तथाप्रत्ययप्रसंगात् तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं तेन गोत्वजन्यद्रव्यत्व प्रलयावृत्तित्वा
मध्वंसप्रागभाववतिरिक्तोपि तथाप्रत्ययप्रसंगात्
दिना गवादेरभावस्य गवाद्यनधिकरणधर्मावच्छेदेन तद्वृत्तिकालेमहाकाले वा तन्नावृत्तिदा गोत्वं तदा गोर्यत्र काले तु तत्र जन्यद्रव्यं प्रलयावृत्ति वेत्यादौ नाति
प्रसंगः हेतुमति प्रलये तत्सामानाधिकरण्याभावात् स्वविशिष्टेति विशेषणात् कपिसंयोगाभाववान्मेयत्वादित्यादौ कपिसंयोगात्मवस्य साध्याभावस्य
सकलहेत्वधिकरणावृत्तित्वेपि नाव्याप्तिः जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावेन तु धूमाद्यभावः जलादावपि तदाभावप्रत्ययप्र
संगात् यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसा
मानाधिकरण्यं तत्त्वं ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव शेषं दर्शितदिशावसेयमत आह प्रतियोग्यवृत्तिश्चेति केचित्तु व्याप्यवृत्तेर्हेतुसमाना

शि०म० धिकरणस्यसाध्याभावस्यप्रतियोगितायाः आनवच्छेदकं हेतुसमानाधिकरणस्यव्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्याभावस्यप्रतियोगितायाः सामानाधि
६ करण्येनानवच्छेदकत्वं साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः एवं च व्याप्तेरव्यभिचारित्वस्वरूपतापि संगच्छते हेतौ साध्यतावच्छेदकावच्छिन्न
साध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वापर्यवसितत्वस्य न क्षतिः सत्तावत्ति च गुणादौ संयोगाद्यभावोपि व्याप्य
वृत्तिः वक्ष्यमाणो वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिह विवक्षितम् भवति च गुणवृत्तित्वं द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियो
गिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्तित्वं संयोगत्वस्येत्याहुः साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकस्य
मानाधिकरणसाध्याभाववत्त्वकत्वं यत्समानाधिकरणसाध्याभावप्रमीपांसाध्यवत्ताद्यनप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्वत्रैव साध्या
भावपदवैयर्थ्यात् यत्तु साध्याभाववन्निष्ठत्वोपहितानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति तन्न अनुमित्यविरोधित्वज्ञानस्यानुमितिहेतुत्वे साध्याभाव
वद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारित्वापत्तिप्रसंगात् केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयो येन तदधिकरणवृत्तित्वाभा
वात्तद्वत्त्वं तत्त्वं साजात्यं च समानासामानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यूनरूपेणसाध्याभावस्य पूर्वोक्तवृत्तीयतया प्रत्येक व्याप्यवृत्तिप्रति
योगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा तेन न तत्साध्यव्यक्तेर्व्याप्यवृत्तेर्वा साध्यस्याभाववन्निष्ठत्वापि हेतोर्नाव्याप्तिः तद्वद्वृत्तित्वाभावस्तत् कृष्ण
तत्साध्याभाववद्वृत्तित्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकोबोध्यः तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्यपार्थिवत्वादिवि
शेषितस्यद्वित्वाद्यवच्छिन्नस्यवासाध्याभाववद्वृत्तित्वस्याभावमादायानातिप्रसंगः अत्र च हेतुतावच्छेदकसंबंधेनसाध्याभाववद्वृत्तित्वं बोध्यं तेन व ६

वृत्त्यभाववत्तिस्वावयवे धूमस्य वृत्तावपि न दोषः इत्थं च साध्याभावोपि हेतुतावच्छेदकसंबंधेन कस्यचिदधिकरणे वर्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हेतुताव
च्छेदकसंबंधेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रति
योगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वं साधनस्य तादृशव्यापकाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्य
तितु न वाच्यं द्रव्यं सत्त्वादित्यादौ सत्तादेस्तादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्ताद्यवच्छिन्नप्रतियोगिताकद्व्याप्तेः प्रमेयत्वाद्यव्यधिकरणप्रतियोगिताप्र
सिद्धेः भावप्रतियोगिकत्वाद्व्याप्तेः ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वात् यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगिता
वच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमित्याहुः परे तु वृत्तिमद्धेतौ यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः वृत्तिमद्धेत
यस्य वृत्तिमत्त्वमपि हेतुतावच्छेदकसंबंधेन बोध्यं तेन व्यधिकरणधर्मावच्छिन्नवह्न्यभाववति संयोगेन वाह्वतेस्तदभावस्य जात्यादौ वर्तमानस्य धूमादावस
त्त्वेपि न क्षतिः साध्याभावश्च पूर्ववद्बोध्यः तद्वृत्तित्वाभावोपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकः तेन तत्साध्याभाववद्वृत्तित्वत्वातिरि
क्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगिताको वा बोध्यः तेनालोकादिवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्ति
त्वस्य यच्चैधनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य तत्र वृत्तेः स्वस्मिन्नसत्त्वेपिनसति
दित्याहुः अन्ये तु वृत्तिमद्धेतौ यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वं तादृशवृत्तित्वाभावः स्वव्यापकतादृशवृत्तित्वव्यापकप्रतियोगिता
को बोध्यः प्रयोजनं चात्र प्रायः साध्याभावाधिकरणवृत्तित्वं तद्व्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नस्यैकभावस्यावृत्तिमद्वृत्तित्वात् व्यभिचारिण्य

शि.म.
७

तिव्याप्तेरतः समुदायेति। साध्याभावः साध्यतावच्छेदकसंबंधेनबोध्यः तेनसमवायेनवह्नेः साध्यत्वे ध्वंसेसंयोगेन वत्तथात्वेवह्न्यवयवत्वेपर्वतेनवह्न्यवयवस
योगेचपर्वतस्यावह्न्यवयवस्यचसंबंधद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेपिनातिव्याप्तिः तथात्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोपि
तेनप्रयत्रपृथिवीत्वाभावादौसाध्येतत्रद्वित्वपक्षाद्वृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धं तत्रसद्धेतौ पृथिवीत्वादौसाध्येजाति
त्वाद्यवच्छिन्नाभाववतिसामान्यानदावत्तमाने द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादौचनाव्याप्तिरतिव्याप्तिर्वा नाप्यभावत्वादिनाऽभावादौसाध्ये
ततत्साध्याभावकूटाधिकरणाप्रसिद्ध्याव्याप्तिरित्याहुः तत्वन्न द्रव्यत्वपृथिवीत्वोभयवान्द्रव्यत्वादित्यादौतदुभयान्यतरत्वावच्छिन्नाभाव
तिद्रव्यत्वादेरवृत्तेरतिव्याप्तेः अपिचेदं पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौद्रव्यत्वाद्यवच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्यद्रव्यत्वेस
त्वादतिव्याप्तेः द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् किंचरूपाभावसाध्यकसद्धेतौसाध्याभा
वसमुदायविषयसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः यावतामभावानामेकाधिकरण्यंसंभवतितावतांसमुदायेविवक्षितेत्वेदं पृथिवीद्र
तिगुणकर्मान्यसमान्यपृथिवीसमवेतकर्मान्यवाघ्राणत्वात् रूपवदन्यत्वादित्यादावतिव्याप्तिः नतत्रतादृशसाध्याभाववत्त्वमस्यनियमतोरूपादिघटितत्वे
नतद्वृत्तिहेतोरवृत्तेः वस्तुतोनिखिलानामेवरूपाणांतादृशाभावसहस्रसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिकरणाप्रसिद्धिर्दुर्वारैव
किंचहेतुतावच्छेदकसंबंधेनसाध्याभाववतियावतिस्तदभावोवक्तव्यः अन्यथाध्वंसादावव्याप्तिः साध्यतावच्छेदकसंबंधेनसाध्याभाववति
कालादौहेतोर्नन्मात्रस्यैववृत्तेर्व्यधिकरण्यातिप्रसंगोपातयाचसमवायादिसाध्यकेसंयोगेनसमवायेनवाहेतत्वेअव्याप्तिः साध्याभाववतितेनसं

कृम
७

बंधेनवह्नेरप्रसिद्धेः साधनसमानाधिकरणत्वेनसाध्याभावविशेषणीयाइतिचेत् विशेष्यंतातथापिभूतत्वमूर्तत्वाद्योरन्यतरत्वेनाभावेसाध्येस्पर्शवद
न्यत्वादावतिव्याप्तिः तादृशसाध्याभावसमुदायवतिपृथिव्यादौतस्याहेतोः किंचमहाकालान्यत्वादिसाध्येकोव्यभिचारिणिकालिकविशेषणता
विशेषणाहेतावतिव्याप्तिः तादृशसाध्याभावसमुदायवतिमहाकालेतेनसंबंधेनवृत्तिमन्मात्रस्यैववृत्तेः एतेनसाध्यतावच्छेदकावच्छिन्नव्याप
कतावच्छिन्नव्यापकताकव्याप्यवृत्तित्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावाद्वृत्तिमद्धेतोयावत्तत्तद्वृत्तिव्याप्तिः केवलान्वयिनः
संयोगाद्यभावस्याभावाः संयोगादयोनव्याप्यवृत्तयः एवंसाध्यस्यगुणसामान्यस्याभावोद्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेनवर्तमानोपिनव्या
प्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगिताकाः कुत्रचिदप्रसिद्धादुसंतापादकाः पुनरभावानहेतुसमानाधिकरणाँवृत्तित्वतदभाववृत्तिमत्त्वानिरुक्ति
रीत्याप्रत्येतव्यानीत्यादिकमपीत्तो तद्विशिष्टेति विशेषणतावच्छेदकविशिष्टज्ञानस्यविशिष्टवैशिष्ट्यमत्यपयरतुत्वादभावमत्ययोहिघटत्वादिविशिष्ट
स्यघटादेः प्रतियोगित्वमवगाहमानएवविशेषणस्यापिघटत्वादेस्तदवच्छेदकत्वमवगाहतेतेनस्वातंत्र्येणघटोनास्तीत्येवप्रतीतिः तदिहाभावप्रत्य
यीयदिव्यधिकरणधर्मेणविशिष्टप्रतियोगिनंनावगाहतेनावगाहतएवतदातस्यापिप्रतियोगितावच्छेदकत्वंअप्यावगाहतेतर्हिभ्रमएवनच
ततोऽर्थसिद्धिरिति भावः यदिपुनरानुभविप्यलोकानांस्वरसवाही घटत्वेनघटोनास्तीत्यादिरनुभवः तदातादृशाभावनिवारणंगौरवेणरूपाणामप्य
शक्यमितिमंतव्यं। साध्येति। साध्यस्यासामानाधिकरण्यंयेषुतेषामनधिकरणत्वंतदभाववत्त्वमितियावत् तस्मिन्सतिसाधिकरणत्वंतदवच्छिन्ना
धिकरणताकत्वंसतिसमव्याप्यवच्छेदाकलाभात् तच्चेहान्यूनवृत्तिकः एवंचसाध्यवद्वृत्तिसकलपदार्थाभावत्वेयदधिकरणतायाअन्यूनवृत्तित्व

सि.म. मितिफलितोर्थः यथासंनिवेशयोऽधिकरणत्वस्य नवैयर्थ्यं हेतुतावच्छेदकसंबंधप्रतीभायवानत् येन येन च संबंधेन यो यः साध्यवदवृत्तिः तेन तेन संबं
धेन तत्तदभावी बोध्याः एतेन साध्यवदवृत्तित्वं तद्धि साध्यतावच्छेदकसंबंधेन विवक्षितं तदा समवायेन साध्यतापन्नसाध्यवदसाध्यवदसमवेतस्य सा
र्वत्रिकत्वात् सकलतद्व्याप्तिः अथ तदभावोपि तादृशेनैव संबंधेन वाच्यः तदा जातिमन्नेयत्वादित्यादावतिव्याप्तिः जातिमदसमवेतानां समवा
येनाभावस्य केवलान्वयित्वात् अत एव न समवायेन संयोगेन वा इदं न जातिमत् जातित्वात् द्रव्यत्वादौ साध्यवत्समवेतासंभवात् हेतुः नापि साधनताव
च्छेदकसंबंधेन इदमेतत्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तेः नापि विषयतया घटनिभिन्नं नेयत्वादित्यत्राप्यतिव्याप्तेः सविषयकमात्रस्यैव घटाभिन्नविषय
कत्वात् घटनिर्विकल्पकेपि घटत्वादिभानात् नापि संबंधमात्रेण द्रव्यं सत्त्वादित्यादावतिव्याप्तेः वृत्तिमन्मात्रस्यैव स्वरूपसंबंधेन महाकालवृत्तेः अहेतेर
भावस्य चाकेवलान्वयित्वादिति भ्रमत्कृते विशेषणताविशेषेण वा साध्यवदवृत्तित्वं वक्तव्यम् सर्वत्रैव तत्तद्व्यक्तित्वेन तत्तदन्यान्यत्वेन तत्प्रकारकप्र
माविषयत्वेन वा तत्त्वलभ्यं तेनैव संबंधेन तदवच्छिन्नसामान्याभावो वाच्य इति केचित्तु नव्यास्त्वाऽऽसेन साध्यानि साध्यविरोधीनि साध्यासमानाधिकर
णानीति यावत् तानि सामानाधिकरण्यानि अधिकरणानि यस्य तत्त्वं साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्यसामान्या
त्वमिति तु फलितार्थः अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबंधेन साध्यवति हेतुतावच्छेदकसंबंधेन या वृत्तिः परं च सामानाधिकर शा.स
ण्यं हेतुतावच्छेदकसंबंधेन हेतुमति तेन वृत्तिः तेन समवायेन पृथिवीत्वादेः साध्यतापन्नाव्यभिचारिणि कालिकसंबंधेन हेतौ द्रव्यत्वादेश्च समू ८
वायेन साध्यतायां समवायेन हेतौ सत्तेगुणत्वादौ सानातिप्रसंगः न वा संयोगेन नवृत्यादौ साध्ये समवायेन तद्व्याप्यस्य रूपविशेषादेः कालिकसंबंधेनाधि

करणे काले स्पंदे कालपरिमाणस्पंदेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि चातिप्रसंगः संबंधविशेषेण व्याप्यत्वलाभाय साधिकरणत्वमिति प्राहुः तच्चिंत्यं
यथाश्रुतं यथासंभवं विकल्प्य दूषयति नेत्यादिना प्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नत्वं वक्तव्यमत आह द्रव्यत्वादेरिति प्रतियोगिविरोधि
त्वं तदधिकरणावृत्तित्वं व्याप्यवृत्तित्वं स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वं अधिकरणेति तथा सत्यभाव एव नास्ति द्वित्यादिति भावः संयोगाद्यभाव
स्य द्रव्ये प्रतियोगिसामानाधिकरण्यमव्याप्यवृत्तित्वं च प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यंताभावप्रतियोगित्वं गुणे
चेप्रतियोग्यसामानाधिकरण्यं व्याप्यवृत्तित्वं च प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुणनिष्ठात्यंताभावाप्रतियोगित्वं एतानि च नभे
दकानि अविरोधात् सामान्यतश्चाव्याप्यवृत्तेः प्रतियोगिसमानाधिकरणे च न तथात्वं व्यतिरेक इति भावः ननु साध्यवान्यस्येति साध्यवति संबंधोन्वेष्यः स
चाधिकरणत्वं साध्यसाधनयोरपि सामानाधिकरण्यमेवेत्यतो दूषणांतरमाह साध्येति साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे यत्तयामे
व व्याप्तिर्निर्वक्तव्या तत्राह वह्निमदिति ननु वत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नं न भवति तद्रूपावच्छिन्नेन समं त
स्य सामानाधिकरण्ये व्याप्तिरित्यर्थः ननु धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निः धूमवान्वह्नेर्मात्रेसमतीते
रित्यत आह विशेषेति यत्र यत्र केवलं वह्निमत्त्वं धूमसमानाधिकरणात्तत्र एव एकाधिकरणवृत्तित्वावच्छिन्नाव वह्निमत्सामान्यभेदस्तु हेतुसमानाधिकरण इति॥
तत्प्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निरिति भवत्यव्याप्तिः साधनेति वैयधिकरण्यं तदनधिकरणवृत्तित्वं तत्र केवलान्वयिनः साधनस्याप्र
सिद्धमतिप्रसंजकं च पृथिवी द्रव्यत्वादित्यादावतः समानाधिकरणपदोपादानं धूमादेरपि नवह्न्यादिसमानाधिकरणद्रव्यत्वाद्यनधिकरणत्वात्

मतोयावदितियद्यपिपृथिवीत्वादिसमानाधिकरणद्रव्यत्वपटत्वाद्यनधिकारणवृत्तित्वंद्रव्यत्वादेस्तदनधिकरणमात्रवृत्तित्वंचनिखिलघटपटादिरूपादीनांतथापिता
दृशधर्मानधिकरणमात्रवृत्तित्वानवच्छेदकसाध्यतावच्छेदकवत्त्वंबोध्यंनहिपृथिवीत्वादिसमानाधिकरणस्तादृशःकश्चिदेकोधर्मोयदनधिकरणमात्रवृत्तित्वाव
च्छेदकंत्वयत्वादिधूमत्वादिकंतुवह्न्यादिसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तित्वावच्छेदकंतदवच्छेदकत्वंचतदन्यतिरिक्तवृत्तित्वं तत्त्वत
च्छून्यधर्मावृत्तित्वं तेनमेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तित्वाद्यनधिकरणगगनादिवृत्तित्वेपिद्रव्यत्वस्यद्रव्यसाध्यकमेयत्वादौनाति
प्रसंगः।वस्तुतस्तुतादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वंतदवच्छेदकरणताकत्वंतदवच्छेदकत्वंवाच्यं तेनसत्ताद्रव्यत्वोभयवान्गुणा
द्यन्यत्वविशिष्टसत्तावान्वाजातिमत्त्वादित्यादौनातिप्रसंगः सत्तायांगुणत्वाभाववन्मात्रवृत्तित्वविरहेपिउभयत्वाद्यवच्छिन्नाधिकरणतायांगुणत्वाभा
ववन्मात्रवृत्तित्वात्प्रमेयत्वादेरिति ननुव्यतिरेकित्वेनधर्मोविशेषणीयः वस्तुतस्तुयावत्स्वंतादृशस्यकस्यापिनवैयधिकरण्यावच्छेदकत्वेनतो
वन्मात्रस्योपरणाय।तथाचसाधनसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकंयद्धर्तद्भिन्नधर्मवत्तायावत्तादृशावच्छेदकत्वमन्यधर्मवत्तावासम
सामानाधिकरण्यमितिपर्यवसितमेतोदोषांतरमाह महानसादाविति तथाचतदनधिकरणवृत्तसमावाधिकरणत्वंतद्वह्निमत्त्वंवाद्यनपिदुष्टमित्यर्थःए
तेनतदधिकरणावृत्तित्वमत्रवैयधिकरण्यंइतिपरास्तं समवायितयामहानसवृत्तित्वंवह्नौनास्तीत्यादिप्रतीतेर्वह्न्यादेरपितादृशवैयधिकरण्याधिकर
णत्वात् संबंधविशेषेणवैयधिकरण्यविवक्षायांनोक्तदोषइतिध्येयं उपाधिपदस्यसाध्यसमव्याप्तवचनतयाआत्माश्रयप्रसंगमाह साध्यव्यापक
त्वइत्यादि व्याप्तिनिरूपकत्वंव्यापकत्वंआत्माश्रयादिग्रस्तमतआह तद्भिन्नेति यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिकोवातत्रापिव्याप्यवृत्तिरखंड

ष्यांतत्तद्वह्निमत्त्वप्रकारकप्रमाविषयत्वाभावादिरेवास्तियदिचतस्यापिविशेषणांतरविशिष्टस्यद्वित्वाद्यवच्छिन्नस्याभावात्तेनाभावस्संभवत्तदासध्धूमसमा
नाधिकरणात्यंताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकधर्मवत्त्वदलद्वयार्थोबोध्यः अनवस्थानिर
सितुमाह प्रतियोगित्वमिति सहेति एकदेशकालावच्छेदेनेतिप्ररणीयं तेननाव्याप्यवृत्तेरभावस्यप्रागभावादेश्चप्रतियोगितायामव्याप्तिः अन्योन्येति अ
त्रसमवायादिसंबंधावच्छिन्नप्रतियोगिताकाभाववतिमहानसादौसंयोगादिनावह्न्यादेर्वृत्तेर्येनसंबंधेनाभावस्तद्वृत्तितेनावृत्तिर्वक्तव्या इत्थंचतेनसं
बंधेनासंबद्धत्वोक्तौनायंदोषः अन्योन्याभावस्यातादात्म्यसंबंधावच्छिन्नप्रतियोगितायांतद्वृत्तितेनसंबंधेनप्रतियोगिनोऽसंबद्धत्वात्परंतुसत्तायाः
समवायेनाभावस्यप्रतियोगितायामव्याप्तिः तद्वृत्तिसमवायेनवृत्तेरप्रसिद्धेः तादृशस्वसंबद्धाधिकरणावृत्तितत्कत्वाभिधानेचव्यधिकरणसंबंधा
वच्छिन्नाभावप्रतियोगितायामव्याप्तिः सिद्धांतलक्षणवक्ष्यमाणरीत्यास्वांशःप्रसिद्ध्यात्तत्परिहारेपीतिध्येयं अभाववविरहत्वमितिनचान्योन्याभा
वप्रतियोगिवत्तात्वावच्छेदकपोरप्रसक्त्यतिप्रसक्तौ प्रकृतोपयोगिप्रतियोगितामात्रस्यलक्ष्यत्वेतुलक्षणेऽत्यंतपदवैयर्थ्यांसवृत्तनित्यस्यनित्यसाधा
रणरूपावच्छिन्नस्यवोपाधित्वासंभवात् इतरथातुभेदप्रतियोगितावारणायसंसर्गाभावपरतयातस्यसार्थकत्वादितिवाच्यं विरहपदस्यतज्ज्ञानप्र
तिबंधकज्ञानविषयोर्थकत्वात्प्रतिबध्यातिहृतादात्म्येनप्रतियोगिमत्राज्ञानमन्योन्याभावबुद्धेः प्रतिबंधकत्वंचात्रैककालावच्छेदेन एकत्राववर्तमान
त्वांअभावपदस्यस्वाभावपरत्वात्वस्तुतस्तुएकसंबंधावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगितायाअनवच्छेदकमपिंभवत्येवसंबंधांतराव
च्छिन्नायास्तस्याअवच्छेदकमतोयत्संबंधावच्छिन्नायाःसाध्यसमानाधिकरणाभावप्रतियोगितायाअनवच्छेदकंतत्संबंधावच्छिन्नायाएवसाध

शि॰म॰ नसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं तद्वाच्यं तथाच संसर्गाभावत्वमनुपादेयमेव वाशब्दः स्वरससूचनाय सच व्यधिकरणसं
बंधेन सर्वस्य प्रतियोगिनस्तादृशसमानाभावात् स्वाभावसंबंधित्वस्य स्वाभाववत्तानविषयत्वस्य वा लघोः सर्वत्रसंभवित्वात् स्वाभावेत्यादौ दोषस्य प्र
१० तियोगितायाः प्रवेशात् तत्र स्वरूपसंबंधविशेषस्यैव शरणीकरणीकरणीयतया तस्यैवावशाकत्वेन तथात्वौचित्यात् अभावत्वप्रतिबंधकत्वयोश्च प्र
तियोगिताघटितत्वात् तथाविधव्यवहारगोचरत्वस्यापि निष्प्रतियोगितां निर्वक्तुमशक्यत्वाच्च यत्साध्यस्य यत्समानाधिकरणसाध्यस्य तथाहि
त्वादि यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं यावत्साध्यसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं साध्यसमानाधिकरणात्यं
ताभावप्रतियोगितानवच्छेदकं यावद्यत्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं तत्त्वमित्यर्थे तु नोक्तदोषइति ध्येयं प्रतियोगितयेच्छे
कसंबंधावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा वक्तव्यं तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किंचित्संबंधावच्छिन्नसाध्यसमानाधिकर
णाभावप्रतियोगितावच्छेदकत्वेपि एकसंबंधावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकस्य संबंधांतरावच्छिन्नसाधनसमाना
धिकरणाभावप्रतियोगितावच्छेदकत्वेपि च न क्षतिः व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगिता
वच्छेदकं साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वं विशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसं राम
गः वस्तुतो यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकयावद्धर्मावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्माव ११
च्छिन्नसामानाधिकरण्यान्योन्याभावप्रतियोगितानवच्छेदकयावद्यत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं तत्त्वं वा व्याप्तिरिति ध्येयं

साध्यमिति यावत्तांतेषामित्यर्थः दूषितं केवलान्वयिन्यव्याप्त्या साच यथोक्तलक्षणेपि गौरवं परमतिरिच्यते कात्स्न्येति साधनस्य साध्यस्य साध्य
स्य साध्याश्रयस्य साध्यसमानाधिकरणस्य साधनाश्रयस्य साधनसमानाधिकरणस्य वा आद्ये कात्स्न्यं साधनसामानाधिकरण्यं साध्ये कात्स्न्ये
षु साधनेषु साध्यसामानाधिकरण्यं वार्थः प्रथमे एकेति नानेति च व्याप्तेश्चाहे चत्वत्वतित्वं पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्ति
श्च अत एवानेतरः अर्थाभिधानद्वयं द्वितीयं निरस्यति अत एवेति अनंतरोक्तयुक्तिसाध्यकात्स्न्ये रेवावेषमव्याप्तेः समव्याप्तेपि चत्वं व्याप
रिमाणादौ एकत्र साधने सकलसाध्यसंबंधस्याभावात् भावावशद्वान्द्रव्यत्वादित्यादौ तृतीये साध्याश्रययावद्वृत्तित्वं चतुर्थे वसाध्यसमाना
धिकरणयावत्सामानाधिकरण्यमर्थः तत्र च यथासंभवं एकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमाव्याप्तेरतिव्याप्तिश्च सत्त्वादौ अर्थपरिष्कार
पूर्वकं पंचमं निरस्यति एकमात्रवृत्तिसाधने अव्याप्तिश्च तथैव पक्षं निरस्यति नापीति तादृशानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितानापि
सामानाधिकरण्यानिकुत्रापि वह्नौ अथ यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मावलीढसामानाधिकरण्यादि
वत्त्वमिति चेत् दूतोपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धांतमेतत् ध्वनयति अविनेति साध्य
विना साध्याभाववति यो भावो वृत्तित्वं हेतोः साध्यं विनाभावः साध्याभावव्यापकीभावप्रतियोगित्वमिति वा अथेति संबंधः सामानाधिकरण्यं
व्यभिचारिसंबंधस्य केनचित् किंचिद्रूपावच्छिन्नेन धूमादेरपि द्रव्यत्वादिना वह्निव्यापकत्वात् तद्दोषादिति न च व्यभिचाराग्रहसहकृतस्य हेतुत्वया
व्यभिचारतद्व्यतिरेकयोरनुपस्थितावपि समानाधिकरणधर्मवत्ताज्ञानमात्रादनुमित्यनुत्पादस्य सर्वानुभावसिद्धत्वात् हेतंतरेतत्रैव चरूप।

पांतरेणाव्यभिचारग्रहे हेतुतावच्छेदकाग्रहेऽप्यनुमितेरुत्पादाच्च विवदंते च सामानाधिकरण्यज्ञानस्यैव हेतुत्वे तयोर्व्यभिचारज्ञानाभावकार्यकारणत्वमपे
क्ष्यकारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतयाऽवच्छेदकत्वमुचितं न च व्यभिचारसंशयेऽनुमित्यनुदयाद्व्यभिचारनिश्चयत्वेन का
रणत्वे कौतो गौरवं व्यभिचारज्ञानस्य भ्रमत्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य तस्य विरोधित्वं वाच्यं अव्यभिचारनिश्चयस्य च भ्र
मत्वशंकायामप्यनुमित्यजनकतया भ्रमत्वेनाग्रह्यमाणस्यैव हेतुत्वमिति तत्र वैपरीत्ये गौरवात् नानाविधव्यभिचारज्ञानाभावानां नियतपूर्ववर्तित्वेन कॢ
प्तानामपि हेतुत्वमपेक्ष्य च वक्ष्यमाणविधाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्यप्याहुः साध्यसामानाधिकरण्यविशिष्टपक्षधर्मत्वं तु पक्षे साध्य
ग्रहं विनाऽसुग्रहमिति केवलान्वयित्वव्याप्तिग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्युत्पत्तेस्तद्ग्रहोऽपि वाच्यः तच्च वृत्तिमद्यत्किंचिदत्यन्ताभावाप्रतियोगित्वादिक
मन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा तथा च सर्वसाधारण्याय लाघवात्साधनवन्निष्ठत्वस्य वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमि
ति सिद्धांतरहस्यं शेषं केवलान्वयित्वे उपनेष्यामः प्रतियोग्यसमानाधिकरणेति प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्य
ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिताव्या
प्तिरित्यर्थः दण्ड्यादौ साध्ये परंपरासंबंधेन दंडत्वादिकमेव साध्यतावच्छेदकमतो ना
व्याप्तिः इत्थं चेद्द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ सत्ताद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादिर्व्याप्तिः साधनस्य विशिष्टस्य
त्वादेस्तु गुणादाववृत्तेः सामानाधिकरण्यघटनाभेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकोत्सर्गैक्यात् व्याप्तेरैक्यं। कस्य धूमत्वादिविशि

ष्टव्यापकवह्निसामानाधिकरण्यस्य शास्त्रादिसाधारण्यात् धूमत्वादिमत्तितादृशसामानाधिकरण्यं तद्वृत्तिधूमत्वादिकं वा व्याप्तिः आद्याभिन्नाद्वितीया व्याप्ति
न्नैवेति ध्येयं अयं कपिसंयोगी एतद्वृक्षत्वादित्यादिसंयहायासमानाधिकरणांतं यत्तु इदं संयोगी द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत् संयोगस्य शाखावच्छे
देन सामान्याभाववृत्तौ विरोधाभावात् न च चातींद्रियस्यापि संयोगस्य सत्त्वात्सत्त्वेतः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षेण संयोग इत्यादिना धूमत्वमिति तत्र भ
द्रव्ये संयोगसामान्याभावप्रमाणाभावात् तच्च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति व्याप्तेः संयोगयावद्विशेषाभावे एवमानं यत्तद्रव्ययोर
ननुगमात् एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च एतेनायं संयोगसामान्याभाववान्यावत्संयोगविशेषाभाववत्त्वादित्यपि परास्तं व्यर्थ
विशेषणत्वात् अप्रयोजकत्वात् निर्गुणत्वादेरुपाधित्वाच्च न च प्रतियोग्यनवच्छेदकत्वयैव वृक्षत्वादेरभावावच्छेदकत्वं गुणाद्यनवच्छेदकप्रमेयत्वादेस्त
दभावावच्छेदकत्वप्रसंगात् यथा च घटः सर्वत्वेतितत्त्वस्य प्रतिदंडं वाशिष्कि सामानाधिकरण्यस्य च प्रतियोगिभिन्नत्वेऽपि दंडत्वं धूमत्वं वा तत्सामान्यस्या
वच्छेदकं तथैव संयोगादिसामान्यस्याच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति संप्रदायविदः नवीनास्तु उत्पत्तिकालावच्छेदेन घटादौ गुणस्य
प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्त्तते तथा च भूतवत्त्वापि विरहो दहनस्य इह पर्वते नित्यं वेह तापनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्या
प्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वे इति प्रतीतो व्याप्यवृत्तित्वस्यात्यन्तप्रसंभावितत्वाच्च एवं प्रतियोगिमत्तोरपि कालदेशयोः कालदेशभेदावच्छेदेन तद
भावः तथा च तत्साध्यकाव्याप्तिवारणाय तत्र नोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके साध्यसाधनभेदेन व्याप्तिभेदादिति वदंति प्रतियोग्यसामाना
धिकरण्यं च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेनायं गुणकर्मान्यत्वविशिष्टसत्तावाजातिमत्वात् सत्त्वात् सत्तावान्द्रव्यत्वादित्यादौ

शि॰अ॰ नातिप्रसंगः न चोभयत्वमेकविशिष्टापरत्वं विशिष्टं च केवलादन्यदितितदभावो मनसि महाजनत एव प्रतियोगिव्यधिकरण इति वाच्यं उभयत्वं हि न विशिष्टत्वा
१२ वनतिरिक्तं न वा तदवच्छिन्नाभावस्तत्तदवच्छिन्नाभावात् वैशिष्ट्यविरहेऽपि घटपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रसक्तसिद्धत्वात् न च तत्र व्याप्तिरे
वेउभयत्वाधिकरणस्य मूर्तत्वस्य मनसि सत्त्वादिति वाच्यं तथात्वेऽपि भयत्वेन रूपेणावृत्तित्वात् नात्रोभयमिति प्रतीतेर्दुर्वारत्वात् अत्यंतपदं चात्यंता
भावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यात्यंताभावत्वनिरूपकप्रतियोगितायाश्चालाभाय अन्यथा सर्वस्यैवाभावस्य स्वसमानाधिकरणात्यंताभावा
तरभिन्नत्वात् तद्भेदस्य च स्वरूपानतिरिक्ततया प्रतियोग्यसामानाधिकरण्यस्यैव दुर्लभत्वापत्तेः सर्वेषामेवाभावानां हेतुसमानाधिकरणात्यंताभावत्वनि
रूपकप्रतियोग्यसमानाधिकरणात्यंताभावात्मकस्य स्वभेदस्य प्रतियोगित्वाद्भावसाध्यकाव्याप्तेश्चेति संप्रदायः अथ यदा गोत्वं तदा गोविसत्राते
व्याप्तिः प्रलयस्य गोध्वंसवत्वेन गवात्यंताभावानधिकरणत्वात् संसर्गाभावमानोऽत्राक्तावपि यदास्यं दत्तदाद्युक्तं यदाः इत्थं तदाजन्यत्वाद्धेतुः स्वं चायदा तस्या
दृष्टांतदातदीयं ज्ञानमित्याद्यावतिव्याप्तिः द्व्यणुकत्वादेर्द्व्यणुकादिभिन्न्यखंडप्रालयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात् नहि तयोः समान्या
भावत्वमतेऽप्येकविशेषप्रागभावविशेषांतरध्वंसवत्त्वापि समये सामान्याविच्छिन्नध्वंसप्रागभावयोः संभवइतिचेत् न प्रतियोगिमत इव ध्वंसादिमतो
पिकालस्यात्यंताभाववत्वविरोधाशीघ्राभावात् अन्यथात्यंताभावस्य कालमात्रावृत्तित्वप्रसंगात्। इत्थं यत्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमप
रस्यतु स्वरूपावच्छिन्नमिति देशकालस्येव कालेदृशस्याप्यवच्छेदकत्वात् तच्छून्ये काले तदभावस्य प्रतियोगिव्यधिकरणत्वात् न च संसर्गाभावविशेषोत्यं
ताभावः संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयाभावत्वं रूपं जन्यत्वाघटकानियमघटितमिति वाच्यं तद्धटकत्वापत्तेस्तु नियमस्य तत्र घटकत्वात् एवं नि

यमान्तरस्यात्तत्र प्रवेशेऽपि न क्षतिरित्याहुः वक्ष्यते च नियमो घटितमेव संसर्गाभावादिलक्षणं अनुपदमेवाविवेचयिष्यते संसर्गाभावत्वप्रवेशप्रयोजनविरहोऽव्याप्तिश्च। अथ
ज्ञानवान् द्रव्यत्वाद्विशेषगुणवान्मानोन्यद्रव्यत्वात् जातिमान् भावत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायां प्रतिव्याप्तिः साध्यशून्यान्यपि हेतुमत्यपि हेतुमत्तां विषय
त्वविशेषणतेकार्थसमवायैः साध्यवत्त्वात्। मैवं प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिनो यदधिकरणं संबधिवातद्वृत्तित्वाभावस्योक्तत्वात् भवति चैवमन्यो
न्याभावोऽपि प्रतियोग्यसमानाधिकरणः तद्धि शिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः तद्वद्वृत्तिभिन्नत्वं तु नार्थः अव्याप्य
वृत्तिसाध्यकव्यभिचारिण्यतिप्रसंगात् अत्र च सामानाधिकरण्यवतो न तदभाववत्वं प्रतीतरन्यथैवोपपादितत्वादित्यास्वरसात् प्रतियोगिवैयधिकरण्येहा
दिविशेषणं वक्ष्यति तच्च हेत्वधिकरणे वोध्यं प्रतियोग्यनधिकरणीकरणी स्वतद्धेत्वधिकरणवृत्त्याभावेति पुनरभावांतार्थे निष्कर्षः नतु प्रतियोगितावच्छेदका
वच्छिन्नस्य यस्य कस्यचित्तत्तत्सामान्यस्य वा प्रतियोगितावच्छेदकयत्किंचिदवच्छिन्नस्य वा अनभिधिकरणत्वमुक्तं आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रतियोग्यधि
करणस्यापि तद्धृत्तपंनत्ताधिकरणत्वात् द्वितीये संयोगसामान्याभाववान्द्रव्यत्वाभाववान्सत्त्वादित्यादावतिव्याप्तिः साध्याभाववतो द्रव्यस्यात्तत्प्रतियोगिसंयो
गविशेषाभाववत्त्वात् नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वाच्च स्वाभावाभावात्मकस्य विशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरेकात् तृतीये क
पिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तिः याध्याभावानां कपिसंयोगानां गुणनामधिकरणस्यात्मनः तत्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छि
न्नानधिकरणत्वात् मैवं। यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत [illegible]दनवच्छेदकत्वस्योक्तत्वात् अत्र च यादृशसामानाधिकरण्ये हेतोर्या
दृशः संबंधप्रविष्टस्तेन संबंधेन यो हेतुमान् तत्र वृत्तमात्रत्वमभावस्य साध्यस्य च यादृशः संबंधप्रतिष्ठस्तत्संबंधावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्व

शि॰ अ॰ बोध्यं तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगितायाः धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेपि वह्नित्वस्य
न क्षतिः यद्वा साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधित्वं हेतुमतो वक्तव्यं तथ च संबंधभेदेन प्रतियोगितानां विशेषणीया एवं स्थिते सामानाधिकरण्यघटकीभूतसंबं
१३ धित्वं निवेशनीयं नो वेत्यधिकरणत्वं तथा च धर्मिणोपि व्याप्यत्वं व्यापकत्वं च निर्वहति नयाहि तादात्म्यसंबंधेन धूमवतः संबंधिनि महानसे वर्त्तमानो योऽन्योन्याभाव
स्तस्य तादात्म्यसंबंधावच्छिन्नाया प्रतियोगिताया अनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतः तादात्म्येन संबंधिनि महानसे धूमवतस्तादात्म्येन तत्संबंधित्व एवं धर्मि
णोपि धर्म्यव्याप्यत्वं व्यापकत्वं बोध्यं अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्रतत्रोक्तं संगच्छते यथा यथा यादृशेन संबंधेन हेतोर्व्याप्यता गृहीता तादृशेन संबं
धेन तस्य पक्षविशिष्टज्ञाने यादृशेन च संबंधेन साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयोर्वैशिष्ट्यानुमितिस्तेन न संयोगेन धूमावयवेन वा समवा
येन पर्वते वह्निधीस्त्येवावगन्तव्या पूर्वताघटकसंबंधेन व्यापकस्याभावग्रहे गृहीतव्याप्यताघटकसंबंधेन व्याप्यस्याभावः सिध्यति। कथमन्यथा सम
वायेन वह्निविरहिणि महानसे संयोगेन संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्तते निवर्तते संयोगेन वह्निविरहिणि स्वावयवे संयोगेनाति
नियम उपपद्यते तथा च तादात्म्यसंबंधेन जलादीनां व्याप्यत्वग्रहात् व्यापकानिवृत्त्या तादात्म्येनैव तेषामभावः सिध्यति स एवाऽन्योन्याभावः इत्थम
वच तादात्म्यात् हस्तिशिंशपयोर्व्याप्तिनिश्चयद्गतिसंगच्छते अत एव चागोत्वबाधग्रहदशायां यत्र सास्नादिः सागोरिति तादात्म्येनागोव्यापकत्वग्रहे सास्नादि
नां तादात्म्येनागोस्तादात्म्येनागोव्यतिरेको व्यसास्नादिव्यतिरेकः सिध्यति। एवं संयोगेन गगनादिरपि द्रव्यत्वादिव्याप्यत्वं वृत्त्यनियामकसंयोगमात्रस्याभा राम
वप्रतियोगितावच्छेदकसंबंधस्वरूपत्वे साध्यतावच्छेदकसंबंधेनाप्रतियोग्यसंबंधित्वासिद्धानेव पृथिवीत्वादिव्यापकत्वमपि न तदभाववतोपि पृथिव्यादेः संयोगेन १३

तत्संबंधित्वात्। सिद्धिरपि तस्य तथैव ननु वृत्तिनियामकसंबंधेन तेनासंबंधित्वात् अव्यापकत्वाच्च व्यक्तौ भविष्यति चेद्गुणपरिहारात्। ननु अपि द्रव्यातिरिक्त
द्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषेण अव्याप्यवृत्ति किमपि व्यापकं न स्यात् स्वावच्छेदकसंबंधेन प्रतियोगिनोऽसंबंधिनि काले वर्त्तमानस्याभा
वस्य प्रतियोगितायां तत्संबंधावच्छिन्नत्वस्य तेन संबंधेन प्रतियोगिसंकर्षितद्व्यत्वस्य च कालेऽसंभवात् न च तादृशसंबंधेन हेत्वधिकरणीभूततया किंचिद्वृत्त्यव
तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वं वक्तव्यं तथा चावृत्तिगगनाद्यभावघटितकैवल्यस्य सिद्धिः सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामा
न्यस्य संयोगसामान्यस्य चावृत्ते नातिप्रसंगः मूर्तत्वमूर्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टादिकं तु न मनोगुणादिवृत्तिसंयोग
सामान्यं तु न किंचिद्व्यावृत्तीति वाच्यं विशिष्टस्यानतिरिक्तत्वात् समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तेः जातिमन्निष्ठतादृशाभावप्रतियोगि
ताया जातित्वेनानवच्छेदात्। जातिमन्त्येव समवायेन वृत्तेरप्रसिद्धेः संयोगादिसाध्यकगुणकर्मान्यत्वादावतिव्याप्तेश्च अद्रव्यं हेतुमति समवायेन वृ
त्तेरप्रसिद्धेः द्रव्ये च संयोगादेरपि वृत्तेः मैवं साध्यतावच्छेदकसंबंधसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वे हेत्वधिकरणीभूततया किंचिद्वृत्त्यनुयोगिक
त्वसामान्यो भयाभावस्य विवक्षितत्वात् धूमसंयोगेन द्व्यधिकरणाभूताऽयोगोलकानुयोगिकत्वस्य अन्यत्वविशिष्टैतद्द्व्यं संयोगे एतद्द्व्यधिकरणचैत्रानुयो
गिकत्वस्य गुणकर्मान्यत्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणानुयोगिकत्वस्याविरहान्नातिप्रसंगः स्वरूपसंबंधेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियो
ग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वं वा ध्वंससमवाय
संबंधेन मेयसामान्याभावत्वसामान्यादौ सत्त्वात् मेयत्वादिरूपभावप्रतियोगितावच्छेदकत्वं सुलभं अत एव समवायस्यैकत्वेन द्रव्यत्वादिप्रतियोगिकत्वागुणाद्य

शि॰ अ॰ नुयोगिकत्वोभयवत्वेपि इत्थं जातिरित्यादौ वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य हित्वावच्छिन्नप्रतियोगिकत्वविरहेपि च नातिव्याप्तिरित्यपि वदंति प्रतियोगित्वा
१४ दिस्वरूपसंबंधविशेषो न संबंधत्वेन प्रविष्टः सामानाधिकरण्येपि संबंधः संयोगत्वादि नैव निविशते दर्शितं च नियमाघटितमपि संबंधत्वं अभावत्वं चेदमिह नाना
स्तीदमिदं न भवतीति प्रतीतिप्रनियामको भावाभावसाधारणः स्वरूपसंबंधविशेषः ततो नाभावसाध्यकव्यभिचारिण्यतिप्रसंगः तदपि नानिपादेयम याजेना
भावात् विदत्वतत्वादिवान् प्रतियोगित्वाधिकरणत्वसंबंधत्वतत्वादयो व्यतिरिक्ता एव पदार्था इत्याप्येकदेशिनः ननु अवच्छेदकत्वमिह न स्वरूपसंबंधवि
शेषः संभवति लघो धर्मे गुरो तदभावात् प्रमेयधूमत्वकंबुग्रीवादिमत्वघ्राणग्राह्यगुणयात्वाणत्वादिरूपतया तेन तत्स्वरूपेण साध्यतायां व्यभिचारिण्यतिप्रसं
गात् नाप्यनतिरिक्तवृत्तित्वं प्रतियोगितायाः स्वरूपसंबंधात्मिकायाः प्रतिव्यक्ति भिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् नच तथाविधयत्किंचिदेका
भावप्रतियोगितासामान्यप्रत्यावृत्तित्वं तत् अतएवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातात् अन्यत्र तत्साधनमपि संगच्छेत इतिवा
च्यं वं हि घटवृत्तिहित्वात्तार्णातार्णदहनवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तित्ववह्नित्वादावतिप्रसंगात् एतेनान्यूनवृत्तित्वविशे
षितमपि तत्परास्तं अतएव नानाप्रतियोगिकत्वैकप्रतियोगितांगीकारेपि न निस्तारः लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः तादृशतदवच्छे
द्यत्वाप्रसिद्धेरिति चेत् न प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् स्वसमानवृत्तिकं चावच्छेदकं व्याख्येयं तत्त्वं च स्वप्रयोज्याधिकरणप्रयोज्यवृत्तिक
त्वं यावत्त्वादिकं तु न तथा पर्याप्त्याश्रयमेको घटः द्वौ द्वावितिप्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः एवं त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना
साध्यतायां नाव्याप्तिः घटकं चावच्छेदकत्वं स्वरूपसंबंधविशेषः एवं च प्रागुक्तयद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति विवक्षणीयं तेनोक्ताव्याप्तिनिरासः

वस्तुतस्तु तदवच्छिन्नप्रतियोगिकाभाववदसंबद्धत्वविशिष्टसामान्यकत्वं स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वकत्वं वा तदनतिरिक्तवृत्तित्वं वा
च्यं अतएव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेपि सत्तात्वस्य न क्षतिः एवं स्वविशिष्टसंबं
धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं वोध्यं तादृशप्रतियोगिताश्च विशिष्यैवोपादेयाः नातो गुरोरवच्छेदकत्वं विना दुर्वचत्वं प्रतियोगित्वं संबंधित्वं च
साध्यतावच्छेदकसंबंधेन बोध्यं अतोन्यसंबंधभेदमादाय दोषः अभावस्य प्रतियोगिव्यधिकरणो बोध्यः कालिकविशेषणताविशेषेण साध्यतायां चत्वार
शप्रतियोगितावच्छेदकत्वमनियतत्वघटितत्वेप्रसिद्धं नच मौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयं संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्वादि
विशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वेन द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाववति चाप्रातेरव्याप्तेरनवकाशादिति वाच्यं धूम
वान् वह्नेरित्यादावतिव्याप्तेः न ह्युत्पत्तिकालावच्छेदेनापि महानसादौ किंचित्संयोगेन वर्तते येन वह्निमदयोगोलकनिष्ठाभावप्रतियोगितावच्छेदका
योगोलके वृत्तिद्रव्यत्वाद्यवच्छिन्नाभाववद्वृत्तित्वं धूमत्वविशिष्टस्य संभाव्येत प्रतियोगितयोरेकसंबंधावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य
वा विवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयं यत्राधिकरणे व्यभिचारस्तदन्यत्वेन तदन्यत्वप्रकारकप्रमाविषयत्वे साध्यवत्त्वप्रकार
कप्रमाविशेष्यत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात् हेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियो
गितानवच्छेदकावच्छेद्यत्वं तत्संबंधत्वाख्यातिव्याप्तेरनवकाशात् तथा चाविशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगि
तानवच्छेदकावच्छेद्यत्वं तत्संबंधावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरि

त्ति पर्यवसितोर्थः यत्र सद्धेतु विशेषे साध्यतावच्छेदकेन प्रतियोगितावच्छेदकं तन्नैवेयं रीतिरूपादेयेत्यपि वदंति गौरवप्रतिसंधानदशायामपि कंबुग्रीवादिमान्नास्तीति
मतीतिबलात् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः नचास्यास्तत्प्रतियोगिकाभावमात्रावलंबनत्वं तथा विषयत्वं किंचित्त्वव्यक्तिसत्वे एतादृशमतीतेरनुदयात्
अतएवैकघटवति भूतले कंबुग्रीवादिमान्नास्तीति शब्दोन प्रमाणं प्रमाणं च घटसामान्याभावे नचैवं लघुरूपमनियतनियतानां गुरूणामव्यापकतापु
त्तिः गुणादिगुणकर्मान्यत्वविशिष्टसत्वादिसमानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूप्याः प्रतियोगितायालाघवेन द्रव्यत्वादिनिष्ठाभावप्रतियो
गितावच्छेदकत्वे चेन्नैवावच्छेदात् तत्तदवच्छेदकत्वव्यक्तीनां चप्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात् एवं द्रव्यत्वत्वादिविशिष्टद्रव्य
त्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वमसंगोऽनुसंधेयः उपदर्शितप्रकारस्यावापि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् अतएव घ्राणग्राह्यगुणत्वादिना साध्य
तायां द्रव्यत्वादेर्व्यभिचारित्वमपि साधु संगच्छते इत्यपि केचिदितिकृतं पल्लवितेन ननु यएवमिलितावह्निभावाज लह्रदादौ वह्निर्नास्तीति धीर्यं जनयति
तायांद्रव्यत्वादेर्व्यभिचा... तदवच्छेदकमेवव
तएवमत्येकं धूम्यतिमहानसादौ वर्त्तते तत्र च तेषां स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपिकायाः प्रतियोगितास्तदवच्छेदकमेवव
ह्नित्वमेतोऽव्याप्तिः नचैवं ह्नित्वावच्छिन्नस्य तद्व्यक्तित्वान्न तथात्वं तथासति ह्रदवृत्तिधूमाभावप्रतियोगितावच्छेदकह्रदावृत्तित्वावच्छिन्नस्य वह्निम
द्वयोगोलकवृत्तित्वाव्याप्तेः अर्थानुगततद्रूपं तन्नरभावप्रतियोगितानां नावच्छेदकं अनवच्छेदकमेव तत्र्भावप्रतियोगितायाः अभावांतरमानाभावात् कृष्ण
तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह सामान्येति संशयान्यथानुपपत्तिमाणयति अन्यथेति वायाविति यद्यप्ययं संशयोन वायु १५
विशेष्यकस्तस्य विशेषणत्विनोस्वात् नवा रूपविशेष्यकस्तथासति रूपतदभावयोर्विरोधिनोरकोटितायामकृतानुपयोगप्रसंगात् तथापि वायुरूप

वान्तदभाववान्वेति रूपतदभावकोटिकसंशयेतावयं अत्यक्तरूपवत्तदन्याभावकोटिक इति भेदप्रतिसंप्रदायविदः विसदृयोरेकाधर्मिसंबंधावगाहित्वान
मेवसंशयोनतु तदुभयप्रकारकतापि नियततथा च रूपतदभावविशेष्यकोवायुविशेषणकोसावितिनव्याः वायुवृत्तित्वतदभावकोटिकोरूपधर्मिकएवायं सं
शयः अधिकरणे तत्तदभावाभ्यांतरनिश्चयस्यापि तत्राधिकरणवृत्तित्वसंशयविरोधित्वात् अन्यथा भूतले घटतदभावान्यतरनिर्णयेपि घटोभूतलवृत्ति
नवेति संशयप्रसंगात् इत्यपरे अथैतावत्सावरूपाणीत्यनिर्णयाद्यावद्रूपाभावानिर्णये संशयोनविरुध्यत इचेत् यावद्रूपाभावानिर्णये स्वस्य यावंतो रू
पाभावास्तेषां यावच्चेनतेषां यावंति रूपाणि तावदभावानां यावच्चद्रूपत्वेनवतदभावानां वा निर्णय इत्यर्थः नप्रथमस्तस्य तथा निर्णीतत्वादेवनेतरो प्राते
यीयत्वानुल्लोखे वियोग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयेमात्रादिव घटतदभावसंशयोच्छेदप्रसंगेनेनतस्यां किंचित्करत्वात् नचातिरिक्तसंभाव
नाविरहसहकृतएवाभावनिश्चयस्तत्प्रतिबंधकः संभावनाच रूपं पार्थिवादित्रितयभिन्नं नवेत्याकारा नैवं तत्तेचेयं रूपत्वावच्छेदेनतात्रितयभिन्नत्वाभाव
निर्णयादेवेतिवाच्यं गौरवात् विनाप्यतिरिक्तसंभावनां विशेषाभावानिर्णयेसामान्यसंशयदर्शनाच्च आथाभावस्य सामान्यावच्छिन्नप्रतियोगिताक
त्वनिश्चयएव तादृशसंशयविरोधी अन्यथा तवाप्यतिप्रसंगात् सचनप्रकृते भावस्य च यावद्विशेषाभावाधिकरणवृत्तित्वविशिष्टस्य तदेव च्छेदेन
वासामान्यावच्छिन्नप्रतियोगिताकत्वं संभवति चेदं तादृशप्रतियोगितायाअतिरिक्तत्वात् तेन नैकविशेषवतो विशेषान्तराभाववत्वेन सामान्याभाववत्व
प्रसंगः नच प्रतियोगितावच्छेदकभेदस्याभावभेदनियामकत्वादेव सिद्धिः प्रतियोगिभेदस्य तत्वे एकघटप्रतियोगिकस्य प्रागभावादिवत्तु तस्याभेदप्रसंगात् अव
च्छेदकं तु भिद्यत एव तत्राकचित्तादात्म्यस्य क्वचिसूवापिरकालीनतद्वृत्तत्वादेस्तथात्वादितिवाच्यं संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकतत्वस्य

शि·अ· दुर्वचत्वात्· ध्वंसपरकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे मानाभावाच्च· किंचावच्छेदकभेदस्याभावभेदनियामकत्वं न तु जनकत्वं अत्यंताभावादिस्वरूपस्य
९६ तस्याजन्यत्वात् नापि तद्व्याप्यत्वं वैयधिकरण्यात्· अत एव न तद्व्यापकत्वमप्यभेदेप्यविशेषात्र न चातदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्र
तियोगिताकान्यत्वस्य व्याप्यत्वे मानाभावात्· अत एव च समनियतसुखदुःखादितत्तत्संख्यापरिमाणवत्त्वादिनानाधर्मावच्छिन्नोप्यभिन्न एवाभावः भेदसिद्धिस्त
भाववदभावस्यापि विरुद्धधर्माध्यासादेव अत एव च गगनादीनामष्टानां समनियतानां वा धर्माणां एकमात्यंताभावः युगपद्विनष्टानामुत्पन्नानां वा समाने
देशानामसति बाधके एक एव ध्वंसः प्रागभावो वेति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोपि चेदभावः प्रामाणिकस्तदा तस्यैकस्यैव प्रतियोगिताः सर्वै रे
व व्यधिकरणैर्धर्मैः सर्वैश्च समानासमानाधिकरणैः संबंधैरवच्छिद्यंतां आकाशाभाव एव वा तथास्तामिति भेवं· एवं हि तत्तद्देशकालावच्छिन्नावच्छिन्नतत्तदधिक
रणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा एकस्यैवाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसंभवेन तद्भेदोपि विलुप्येत तत्प्रतियोगिकत्वं तु तत्स्वभावेन
चात्राधिकरणादिविशेषवृत्तित्वस्यांतर्भावो वावच्छेदकत्वं वेति तुल्यमानं· अत एव सामान्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि प्रत्युक्तं· अव्यासज्यवृत्तस्त
त्स्वभावस्वस्य तत्त्वानुपपत्तेः अतिरिक्तकल्पने च किं प्रपराद्धमतिरिक्ताभावेन· किंच व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवत् व्यधिकरणानामपि विशे
षाभावानां युगपदिंद्रियसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्यायोपि स्यात्· अपि च स्वरूपांतरेण संबंधविषयावाव्यासज्यवृत्तिधर्मस्य ज्ञानेन
यावदाश्रयसन्निकर्षापेक्षा मानाभावात्· एवं च काभावसन्निकर्षेपि सामान्याभावबुद्धिप्रसंगः यादृशे च तस्य ज्ञाने यावदाश्रयाणां संनिकर्षोपेक्ष्यते तत्र ते
षां तद्भेदस्य च ज्ञानमपि· तदज्ञाने तद्भेदज्ञाने च तदग्रहात्· आश्रयभेदक्रमेण तद्भ्रमदर्शनात् ज्ञानं चात्र यावद्विशेषाभावानां प्रथममनुपस्थितिः संभवति त

प्रतियोगिनां विशेषतोनुपस्थितेरिति दिक्· केचित्तु· अनंतविशेषाभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघ
वात्सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात्सामान्यावच्छिन्नप्रतियोगिताकत्वैनैक एवाभावः कल्प्यते कल्पनीय
शरीरस्योभयत्वेपि तदपेक्षस्य तस्य गुरुत्वात्· विनिगमनाभावेपि च सामान्याभावसिद्धिरप्रत्यूहैव धर्मकल्पनातो धर्मिकल्पनाया गुरुत्वं कल्पनायाने
केत्वप्रयुक्तं अत्यानिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्यानंतवा व्याव्यधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य क्लृप्तानंताधिकरण
वृत्तित्वानां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्याज्यवृत्तित्वस्य च कल्पनैव लघीयसीति वाच्ये एवं सत्यभावमात्रासिद्धिप्र
सगादित्यादुः· येद्व्यादि· अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः न च तत्र रूपवत्त्वादिकमेव साध्यं तच्च परंपरासंबंधेन रू
पत्वादिकमेव तेन संबंधेन तदभावः पृथिव्यादाविति वाच्यं रूपादेस्साध्यतापत्तेः द्रव्यान्यत्वादिविशिष्टसत्त्वाद्यभावस्य द्रव्यादिवृत्तित्वात् सा
नादिसाध्यकद्रव्यत्वादावव्याप्तिश्च अन्यथा विशिष्टतया सत्त्वादेः साध्यत्वे व्यभिचारिणि जातिजातिमत्त्वादावतिप्रसंगात् अनुसरिष्यते च विशिष्टा
भावस्य विशिष्यप्रतियोगिकत्वं हेत्वाद्यवच्छिन्नस्य साध्याभावस्य तत्र सत्त्वात्· अथ प्रतियोगित्वं प्रतियोगित्वाभावः स च येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हे
तौ अस्ति चायं रूपादौ रूपत्वादिना न पृथिव्यादिनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न तादृशप्रतीत्या हि रूपत्वादौ प्रतियोगितायाः अवच्छेदकत्वाभावो ग्र
ह्यते न तु तदभावावच्छेदकत्वं सर्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न तु कुत्रापि रूपे तदभावः इत्याबाधितप्रत्ययात् अन्यथा यो यो धर्मो यस्य तन्नावच्छेदकः
तत्तदवच्छेदेन तादृशप्रतियोगिताभावोप्युक्तरीत्या सिध्येत्· प्रमेयत्वमस्ति न वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात् तदवच्छेदेन तादृशप्रतियोगिताभावस्यापि

शि·अ· सुंवच्चात्: अथप्रमेयधूमत्वं गौरवेण न सामानाधिकरण्यप्रतियोगितावच्छेदकं विवक्षिते चात्र तथेति चेत् असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्व
मपि न तदवच्छेदकं कंबुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति बहुव्याकोपः अतएव प्रमेयधूमत्वे गौरवेण प्रतियोगितायाऽवच्छेदकतया अपि न
१७ वच्छेदकमित्युक्तावपि न निस्तारः अत्र वदंति अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्मवत्त्वमत्रापि वाच्यं न चैवं घटत्वमप्यभेदः तत्र साध्यजातीयसमानाधिक
रणसाधनजातीयत्वस्यात्र साध्यसाधनसामानाधिकरण्यरूपव्याप्तित्वेन तात्पर्यात् घटाकयोः तादृशप्रतियोगितावच्छेदकत्वादन्योन्यासंताभावयोर्भेदा
दृष्टव्यपि कश्चित् अत्यंताभावगर्भवत्सामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिद्वयमाह यत्समानाधिकरणेत्यादिलक्षणद्वयेन प्रथमे एकस्य सा
ध्याधिकरणत्वांशस्याधिक्यात्वाद्वितीयं लक्षणं तं अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवतः तत्तत्साध्यवत्त्वस्य च साधनसमानाधिकरणान्यो
न्याभावप्रतियोगित्वात्तदवच्छेदकत्वाच्चाव्याप्तिः तथापि यद्रूपावच्छिन्नवत्त्वं तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमि २
त्यत्र तात्पर्यं वह्न्यादौ तत्संयोगादौ तद्वहादौ चासाध्ये सर्वत्र साक्षात्परंपरया वानुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकं तद्वदवच्छिन्नवत्त्वस्य च न तादृशान्योन्या
भावाप्रतियोगितावच्छेदकत्वमिति यत्त्वयद्रूपावच्छिन्ने यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथा यथैवं वक्तव्ये तत्राद्येऽव्याप्त्यनुपादेयत्वात् अथान्ये त्वादि
य घटपुक्कं वीरवार्सर्वत्र तादृशाभावप्रतियोगितानवच्छेदक पर्यंतानुधावनस्यावश्यकत्वेनाकिंचित्करमेव तादृशाभावप्रतियोगिवंताप्याथिविशेषसामाना
८ धिकरण्यरूपाया व्याप्तेर्व्यधिकरणसंभाविलमात्रेतात्पर्याद्विशिष्टे साध्यकालिकी त्यादि: अन्योन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसद्धेतुवत्वाद्विनिरस्य
तिनचेति अभेदस्येति तथा च मूले महीरुहो विहंगमसंयोगीनेति प्रतीतेरनुभूयमानविशिष्टभेदो हस्ति न्याआपि शिखी विनष्ट इत्यादिप्रतीतिवाद्विशेषणाभावविष

यतामात्रं कल्प्यते बाधकबलात् यत्र च विशिष्टभेदेन बाधकं तत्र तथा प्रतीतिबलात्तात्सिद्धिरस्तु हैवेत्तिनातिप्रसंगः अत्र वदंति अभेदस्य भेदाभावत्वज्ञानेन
बाधकं भेदवत्त्वप्रतियोगितावच्छेदकस्य संयोगात्मनस्तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः यथा हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानेन तदसत्ता
भावस्याग्रहात्तदभावव्यवहारात्त्व स एव तादृभावत्वतिकल्प्यते तथा प्रतियोगितावच्छेदके धर्मग्रहे तद्वदन्योन्याभावस्याग्रहात्तदभावव्यवहारात्त्व स एव तस्याहि ग
णेशभावत्ति निर्णीयते: आधिक्येपि चाव्याप्यवृत्तित्वात् अतएव न मूलावच्छेदेन कपिसंयोगिभेदाभावज्ञानं तथा असंभवादसिद्धेश्च नापि संयोगिभेद
स्य वक्षाग्रतित्वज्ञानमसिद्धेः तद्वृत्तित्वस्यैव ग्रहात् नापि कपिसंयोगिभिन्ने भेदज्ञानं कपिसंयोगिभेदवत्तद्वृत्तेदस्याव्याप्यवृत्तित्वेनाविरोधात् नापिमू
लावच्छेदेन तज्ज्ञानं असिद्धेः तद्धर्मवद्भिन्नभेदस्य तद्धर्ममात्रपर्यवसायितया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वविरोधाच्च न हि घटभिन्न
भेदाघटत्वादभिद्यते: आवश्यकक्लृप्तघटत्वादति रिच्यते: आत्तकल्पनायां मानाभावात् अन्यथा सर्वत्राभावस्याभावोतिरिक्त एव कल्प्येत् अतए
वात्यंताभावप्रतियोगिनोऽन्योन्याभावप्रतियोगितावच्छेदकयोश्च सामान्यत एव क्लृप्तो विशेषः तत्र कपिसंयोगवत्यपि वृक्षे मूलेन कपिसंयोग इति प्र
तीतेरन्यथानुपपत्त्या तादृशयोः संकोच्यतां न त्वेषा प्रतीतिः कपिसंयोगिभेदविषयकत्वेनापयोदायितुं न्यास्यानियमतः संयोगत्वेन प्रतियोगि
नोऽनुपस्थितेः प्रतियोगिको वेतदनुच्छेदस्याच्च मूले तस्मान्न कपिसंयोगीति प्रतीतेस्तु शिखी विनष्ट इति वत्प्रसमानविशेषणस्याभावमात्रविषयत्वेनोपप
न्नत्वान्नेतिमयोरपीति यदास्तः अन्योन्याभावात्तारस्य प्रतियोगितावच्छेदकोतस्समानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकसामानाधिकरण्यप
र्यवसायिनो विरोधस्य स्वत्वघटितत्वेयाविशेषएव विशेषमात्रं अत्यंताभावप्रतियोगितोऽविवान्योन्याभावप्रतियोगितावच्छेदकयो रवाधितसामानाधि

शि·अ· कर एवानुभवेन प्रतिरुद्धत्वात्तथाविधविरोधकल्पनाया अनवकाशाच्च· किंच विशिष्टविनष्ट इति प्रतीतेर्विशिष्टध्वंसोऽप्येकस्यापि विशेषणतद्व्यधिकरणादि
१९ विशेषणध्वंसविषयतानसंयोगीतिप्रतीतेर्विशिष्टमेदृग्भवादमानायाः कथं विशेषणसंसर्गाभावविषयकत्वेनोपपत्तिः नखलुसहत्वं विषाचर्के विदं
जनमितिप्रतीतेरंगत्वावलंबनेनत्वंव्यवस्थापयितुंशक्यते नचविशेषणभेद एवतस्याविषयः अन्येनसंयोगीतिप्रतीत्यापत्तेः युज्यतेचाप्या प्रवृत्तिर
न्योन्याभावः कथमन्यथा पक्वतादशायां घटादावयंनश्यामो दंडादिविनाशसमन्वेच चैत्रादौनायंतद्दंडवानिसादृयोव्यवहाराः नचतत्र विशेषणस्यसंसर्गा
भावएवप्रतीयते अनुयोगिनि सप्तमीविरहीतदनुपपत्तेः नखलुभूतलेन घटइत्यादौनिकशाचिदपि घटसंसर्गाभावं बोधयंति तथात्वेवा घटेन
घटइत्यादेरपि प्रसंगात् अपिच विशिष्टवाचकदंडादिपदेभ्यो धस्यपसर्जनतयोपस्थितस्य दंडादेः कथंप्रतियोगित्वेनाभावेन्वयः इतरविशे
षणत्वेनोपस्थितस्य निराकांक्षतयान्यत्रविशेषणत्वेनान्वयायोगात् । नवात्र विशिष्टोपस्थापकं पदविशेषणमात्रपरं तथासति चैत्रोनदंडी घटोनस्य
मरूपमित्यादिप्रतीतेरपिदंडादिसंसर्गाभावविषयत्वापत्तेर्दुर्वारत्वात्· एतेनन अत्रो भाववल्लाक्षणिकतयाविनेक्वसद्धर्मान्वयो वा धसमर्थनं प्रसुक्त
एवच चैत्रोनपचतीत्यादावाख्यातार्थतयालक्षणयावाऽवच्छिन्नस्यकर्तुरेवभेदोभासतइत्युक्तं वस्तुतो नपचतिचैत्रोनेदं मैत्रस्येत्यादौविभ
क्त्यर्थस्यकृतिसंबंधादेरभावस्य बोधनेनञासद्धर्मीनापेक्ष्यते अपेक्ष्यते च प्रातिपदिकार्थस्येतिनिपुणतरमुपपादयिष्यामः नत्रो वै
धर्म्यपरतयानश्याम इत्यादिविधर्मेत्वंर्थः वैधर्म्यं चरक्तत्वैकदिकमेव यदाहुराचार्याः श्यामाद्रक्तो विधर्मा नतु द्रव्यमिस्यपिवदंति इतिकृतेतत्पक्षवि
तेनरसंबंधत्वेनैवेति । निरूपिततत्वकमेतत्· कल्पेति इत्याचानुगतायाअपिव्याप्तेर्यायत्तेनिमुमित्तिहेतुत्तथावक्ष्यते· एतेःसंतात्वोन्या

भावरगर्भेन्तादृशेति ननुकिंद्वित्वादिकंप्रतियोगितावच्छेदकमेवनभवति· किंवाभवत्येवपरंतुरूपत्वानामेवस्वसमानाधिकरणतन्तद्धर्मावच्छिन्नप्रतियोगि
ताकानानाभावानांलाघवादित्यभिप्रायः नाद्यः एकैकाभावप्रतीतितोद्वौनस्तइतिप्रतीतेर्विलक्षणत्वात् शाद्वादिनाद्वौनस्तइति निश्चयेप्येकैकाभावसं
शयदर्शनात् विषयानुगमंविनानुगतीकारप्रत्ययायोगात् न चाभावस्यद्वित्वाधिकरणप्रतियोगिकत्वं द्वित्वसमानाधिकरणधर्मावच्छिन्नप्र
तियोगिकत्वात्तकत्वमात्रवाद्वयंनास्तीतिप्रतीतेर्विषयः तादृशाद्वित्वाधिकरणव्यक्तिविशेषविरहिणितथाविधोभयशालिनितादृशौद्वौनस्तइत्ययात् द्वित्व
सामानाधिकरण्यामानेपिप्रतीतेरनुगताकारत्वाच्च । अतएवनतादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वं अन्यतरत्वाच्च
अतएवनतादृशप्रतीतेघटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वं अन्यतरत्वानुल्लेखेपिघटपटौनस्तइत्यनुगतप्रत्ययात् नचपरं
परासंबंधेनतादृशद्वित्वसामान्याभावएवद्वौनस्तइतिप्रतीतेर्विषयः द्वित्वाधिकरणयोरेवप्रतियोगित्वेनोल्लेखात् द्वित्वादेर्घटादिवृत्तित्वानुप
स्थितावपितत्तःशाब्देनापिघटपटौनस्तइत्यादिप्रत्ययाच्च· अतएवैकविशिष्टापराभावोपिनतदालंबनं । विरुद्धयोरपिजलत्वपृथिवीत्वयोर्द्वित्वेना
भावप्रत्ययादित्युक्तत्वाच्च नांत्यः तथात्वेपिसाध्यतद्वतोस्तादृशाभावप्रतियोगित्वानपायात् अंतरेणचाभावांतरमेकैकघटवतिजायमानायांक्लि
विद्वद्द्वयवतिचानुत्पद्यमानायांघटौनस्तइतिप्रतीतेरुपपादयितुमशक्यत्वादित्यतआह अभ्युपगमेवेति तदुभयत्वमेवप्रतियोगितावच्छेदकंन
तुसाध्यतावच्छेदकंसाध्यवत्वंवेत्यर्थः अभ्युपगम्यमानावच्छेदकत्वाशेपिलक्षणेतथैवविवक्षितामिति भावः तत्रेति । स्वसाधनत्वाभिमत । तथाचसा
धनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकायावंतो धर्मायद्धर्मावच्छिन्नसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकास्तद्

गवच्छिन्नसामानाधिकरण्यमित्यर्थः एतेनसर्वत्रतादृशैर्यविद्धिर्विछिन्नस्यतादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसंजकात्यावत्वावच्छिन्नप्रतियोगि
ताकादतिरिक्तस्याभावस्याप्रसिद्धिः तादृशावच्छिन्नप्रतियोगिताकानांयावदभावानामधिकरणस्यापिमायज्ञत्वया रूपादिसाध्यकपृथिवीत्वादावव्या
प्तिः कापिरूपादिव्यक्तौ नादृशयावदभावसामानाधिकरण्यासंभवादितिप्रत्युक्तं सर्वत्रसो याधावेकव्यक्तिकस्यसंभवत्तोस्युपाधेर्धर्मोत्तरविशिष्टत्वादिना
भावोभवत्येवसाध्यसमानाधिकरणइत्यवच्छेदकानुसरणं साध्यनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकायांवतोभावायदुभा
वच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः अभावश्चात्रभावभिन्नोग्राह्यः तेनेदंजलंस्नेहवत्वादिसाद्यौस्नेहवत्वसमानाधिकरणात्यं
ताभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानांसकलरूपाणांजलत्वसामानाधिकरण्यविरहेपिनाव्याप्तिः घटध्वंसो
ध्वंसत्वादित्यादौ च घटध्वंसात्वादेस्तत्प्रकारकप्रमाविषयत्वादेर्वेभावाभावद्विनिरतिरिक्तोऽभावस्तादृशोनघटध्वंसत्वादिसमानाधिकरणइतिनातिव्या
प्तिरित्यपिवदंति यावदितिसंव्यभिचारियेषांयावतांव्यभिचारिणासाध्येनसामानाधिकरण्यमित्यर्थः यावदिति यत्पदंसाध्यध्वत्वाभिमतपरं सोपाधि
वारणाययावदितिलुप्तसप्तमीकस्यद्वितीयासती भावस्यविशेषणं तथाचसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकात्यंताभावत्वव्यापका
त्वसामानाधिकरण्यसामान्याभावकत्वमर्थः केवलान्वयिस्थले तुस्त्राकाशादिरेवतयातिधोभावः प्रसिद्धइतिसंप्रदायः केचित्तुतादृशयावदभावस्वत्वंय
दधिकरणातायाव्यापकंतत्वमित्यर्थः नचातादृशप्रतियोगितानवच्छेदकवत्तमेवयावत्वनवेशिष्ययावतादृशाश्रयत्वंयदधिकरणातायाव्यापकंतत्वमित्यर्थत्ता
भादेवसामंजस्येभावद्वयोपादानमनतिप्रयोजनकमितिवाच्यं यावतांतादृशानांधर्मीदीनामैकाधिकरण्यस्याप्रसिद्धेः नचावच्छेदकोशमनुपादेयाप्रतियोगितिग्ये

वयावत्वेनविशेष्यत्वां साध्यव्यापकस्यापिरूपांतरेणसाध्यसमानाधिकरणात्यंताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः साध्यसमानाधिकरणात्यंताभावप्र
तियोगितानवच्छेदकेयावत्तियत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वानात्तितत्वमर्थइतितुनव्याः अवच्छिन्नेसामानाधिकरण्येसामानाधिकरण्या
वच्छेदकरूपवत्वंवाव्याप्तिः इत्थंचधूमवद्व्यक्त्यादिस्यवच्छेदकत्वं दंडत्वादेर्नियतपूर्ववर्त्तितावच्छेदकधर्मात्मककारणतावच्छेदकत्ववदभेदेपिउपहितानु
पहितेदाद्वासमर्थनीयांतत्राद्यमभिप्रेत्याह यत्संबंधितेति सासंबंधितासामानाधिकरण्यारूपाजनकत्वादित्याहृता अत्रचविशिष्टसत्तात्वाद्यवच्छिन्नगु
णादिसामानाधिकरण्याधिकरणसत्त्वादेः कर्मांशेपरामर्शाद्गुणाद्यनुमित्यापत्तिः साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शात्पक्षेसाध्यनिर्णया
त् प्रागसंभवीत्यंनुशयेनद्वितीयं अयमालोको धूमोवेत्यादौविशिष्यसंदेहेपिसामान्यतोवच्छेदवरूपवत्वनिर्णयः संभवत्येवतिहृदयं अत्रचावच्छेदकत्वं
नान्यूननतिरिक्तत्वं अन्यूनानतिरिक्तवृत्तित्वंवा वाक्यादृसाध्येमेयत्वादावतिप्रसंगात् ध्वसत्तादावप्रसंगाच्च किंत्वनतिरिक्तवृत्तित्वं तच्चयद्यपितदभाववद्वृ
त्तित्वे गुणवत्त्वचो याइत्यात्रसत्तात्वेतिप्रसंगात् नचकर्मादिवृत्तित्वावच्छेदेनगुणसामानाधिकरण्याभाववत्यासत्तायावर्त्तमानत्वात्तथासतिविशिष्टस
त्तादेमागुपदर्शितदिशाचधूमत्वादावव्याप्तिप्रसंगात् तथाप्यतिरिक्तेयद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वंनवर्त्ततेतत्वं साध्यासमानाधिकरणावृत्तिस्वविशि
ष्टाधिकरणवृत्तित्वसामान्यकत्वं स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वंवेतिफलितार्थः सत्तात्वविशिष्टसत्वाधिकरणकर्मादिवृत्तित्व
स्यसाध्यासमानाधिकरणेकर्मत्वादौसत्वान्नातिप्रसंगः कर्माद्यन्यत्वविशिष्टसत्ताश्रयश्चनकर्मादिरितिनाप्रसंगः एवंचमेयत्वादेरपिकेवलान्वयिसामाना
धिकरण्यावच्छेदकत्वोपपत्तिः यत्तुइतिमत्वादिकमेवतत्रव्याप्तिः तद्गुरुत्वमेयत्वादिनेतितन्न व्याप्तिविरहिहृत्तितयागृह्यमाणेनरूपेणव्याप्तिग्रहासंभ

शि०अ० वात् अन्यथातिप्रसंगात् साध्यतावछेदकसंबंधेन साध्याधिकरणे येन येन संबंधेनावर्त्तमानत्वं हेतुतावछेदकसंबंधेन हेत्वधिकरणेपि तेनैव न तथात्वं बोध्यं ·
नील धूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणतादृशधर्मांतराघटितत्वेन विशेषणीयं सामानाधिकरण्योपादानाद् धूमप्रागभावत्वादिसंग्रहः तद्घटितत्वं च तद्
२० विषयकप्रतीतिविषयत्वं स्वरूपसंबंधविशेष एवावछेदकत्वं अत एव नातिप्रसक्तमवछेदकमित्यादिकमपि संगछते अन्यथातिप्रसक्ते अनतिप्रसक्त
त्वस्याप्रसक्तत्वेन तन्निराकरणायोगात् विरुद्धयोश्च भावाभावयोरधिकरण एकस्यैकेन संबंधेन वृत्तिर्विरुध्यते अतस्तत्रावछेदकभेदापेक्षा अत एव व्यभिचारि
त्वस्याप्रसक्तत्वेन तन्निराकरणायोगात् विरुद्धयोश्च भावाभावयोरधिकरणे एकस्यैकेन संबंधेन वृत्तिर्विरुध्यते अतस्तत्रावछेदकभेदापेक्षा अत एव व्यभिचारि
णि साध्यतद्भावसामानाधिकरण्ययोर्वृत्तिद्वयोरुपपादनाय उपाधितद्भावावछेदकवत्तु मन्यंते न्यायाचार्याः स तात्वं तु गुणाभावस्येव गुणस्यापि न सामा
नाधिकरण्यावछेदकं विरोधात् अव्याप्यवृत्तेश्च संयोगादेराधिकरणे वृक्षादौ तद्भावस्य संयोगेन वह्न्यादेरधिकरणे महानसादौ समवायावछिन्नप्रतियोगि
ताकतद्भावस्य सत्त्वेनाविरुद्धत्वात् वह्निमति संयोगेन वर्त्तमानस्य धूमादेर्वह्न्यभाववति स्वावयवे संयोगेनावर्त्तमानत्वात् चन्द्रस्तत्त्वस्य धूमत्वादेर्न साध्यसामाना
धिकरण्यावछेदकत्वविरोधः व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव तद्धर्मविशिष्टस्य साध्यानधिकरणावृत्तित्वग्रहे तदवछेदेन साध्याधिकरण
वृत्तित्वग्रहायोगात् अत एवात एतत्र तेहेतुवृत्तिधर्मस्य साध्यसामानाधिकरण्यानवछेदकत्वमेव व्यभिचारः तद्धीरेव साक्षाद्व्याप्तिधीविरोधिनी व्यभिचारांतर
धीस्तु परंपरयेति नीलधूमत्वादिकं तु गौरवान्नावछेदकं एवं च लघुघटत्वादिकमेव सामानाधिकरण्यावछेदकं व्याप्तिः न तु तत्त्वाह चरितर्कत्रयी वह्निमत्त्वादि
कं तेन च गुरुत्वापि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वा अनुयोगः प्रकारांतरव्याप्तिवादिनामपि समानः एवं द्रव्यं रूपाद्रसादित्वादौ सकलगुणस
धारणस्य गुणत्वस्य द्रव्यादि साधारणस्य गुणासमवेतत्वे सति द्रव्यसमवेतत्वस्य वैकस्यावछेदकत्वसंभवे बहूनां रूपत्वादीनामपि न तत्त्वमिति विरुद्धधर्मद्

याधिकरणयोरेकस्यैकेन संबंधेन वृत्तौ कथं विरोधः कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्य रूपादेः प्रयोगः तथा परामर्शोद्यानुमितिरिति तु विभावनीये अपरे
तु यद्धर्मविशिष्टे स्वधिकरणत्वे साध्याधिकरणताया अवछेदकं स धर्मो व्याप्तिः ग्रंथं स्त धूमस्य धूमवतः धूमत्वे धूमवत्वं वह्नेस्तु वह्निमत्त्वकं इत्यादिग्रंथा
रेण व्याख्येयः अत्र चावछेदकत्वं न स्वरूपसंबंधविशेषः विरुद्धदिक्कालावछिन्नवृत्तिकस्य न्यूनदेशकालवृत्तिकादेश्चाधिकरणतायां तादृसंभवात्तुल्यवृत्तिक
धर्मद्वयाधिकरणतयोर्मिथोवछेदकभावस्य चानियंतुमशक्यत्वात् नाप्यन्यूनवृत्तित्वं न्यूनवृत्तिकधूमादशव्याप्यतापत्तेः किंतु नातिरिक्तवृत्तित्वं स्वा
न्यूनवृत्तित्वं च मितियावत् अतो न केवलान्वयिन्या व्याप्तिः अत्र च यद्न्यूनवृत्तिसाध्यं तत्त्वं स्वव्यापकसाध्यसंबंधित्वपर्यवसन्नमपेक्ष्य गौरवं परम
वाशिष्यते तच्चाग्रे ग्रंथाकार एव वृत्तिविवेचयिष्यतीत्याहुः उपाधिनेति विशेषणतामापन्नेन उपाध्यनुप्रविष्टतपाधिविशिष्टेनेतियावत् नेतियावत् वह्नेर्वि
धनप्रभववह्नित्वेन रासभादेर्धूमादौ च तथाविधवह्निविशिष्टत्वेन धूमसंबंधेन विद्यमाने तथाविधवह्नेरप्यनुप्रवेशात् रासभत्वादिकं तु न विशेषतेन च
न्यदेतत् अत्र चेद् स्नेहवान्नैः स्नेहं वा स्पर्शोदिस्त्र विनाप्युपाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यसमानाधिकरणतया साधनव्यापकत्वयावास्
यमनुपाधिना केवले न विशेषणी भूय वा शीतान्यस्पर्शत्वं चोपाधिना स्वतः एवस्य शैसाध्यसंबधोऽवधिघृतइति उपाधिनेवेत्यनियमेन नता त्वयं परंतु
गुरुत्वस्य साधनतावछेदकस्यानवछेदकतामन्त्रेय तन एवं सोपाधौ साधनतावछेदकातिरिक्तानेयतमवछेदकमत एवत द्विशिष्टत्रोपाधिरिति वदंती त्या
हेत एवेति अत्रावछेदकं सामानाधिकरण्येन तत्त्वं चान्यूनवृत्तित्वं व्यापकत्वमिति यावत् तत्त्वाधिकरणांतर्भावेण तेन साध्याविशिष्टसाधनतावछेद
कावछिन्नसाधनवत्वव्यापकाधिकरणताकत्वपर्यवस्यति निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः इत्थं च सत्ता सैकव्यक्तिकहेतुनि द्रव्यत्वा

चिं.टी.शि. दिसामानाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनिघटत्वादौ नातिप्रसंगः नवाद्रव्यं जन्यत्वे सति सत्वादित्यादौ द्रव्यत्वविशिष्टसत्ताव्यापकेत्यत्रोक्तत्वा
२१ दाप्रसंगः निःस्नेहे स्पर्शात् द्रव्यं सत्वादित्यादौ स्पर्शात्स्पर्शान्यात्स्वरूपान्यात्त्वादिनिवारणाय तत्रेत्यादि तत्र साध्यविशिष्टस्य साधनेन विशेषणं साध्याभावविशि
ष्टात्साधनात्सामानाधिकरण्येन व्यावर्तकं साध्याभावविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनवद्वृत्तीतियावत् एवं द्रव्यं सत्वादित्यत्र सत्ताया अभे
देपि गुणकर्मान्यत्वेन व्याप्तिः नवाद्रव्यं कर्मान्यत्वे सति सत्वादित्यत्र गुणान्यत्वे। ६ ग्रंथ